अर्थ—पञ्च इन्द्रियोके इष्ट-अनिष्ट विषयोमे राग-द्वेषका त्याग करना, ये वे पाच भावनाएं हैं, जिनका कि अपरिग्रह व्रतकी रक्षाके लिये मुनि चिन्तन करते हैं । इस प्रकार पाच महाव्रतोकी रक्षाके लिये पच्चीस भावनाए कही ॥ ११४-११५ ॥

आगे मुनिव्रतकी प्रधानता बतलाते हुए महाव्रताधिकारका समारोप करते हैं—

अनादिकालाद् भ्रमता भवेऽस्मिन् जीवेन या दुःखततिः प्रभुक्ता।
तस्या विनाशे यतिवृत्तमेव समर्थमत्रास्ति न किंचिदन्यात् ॥ ११६ ॥
तदेव शक्त्या भुविधारणीयं तदेव भक्त्या मनसा प्रचिन्त्यम्।
तदेव वाचा वचनीयमत्र तदेव कायात् करणीयमस्ति ॥ ११७ ॥

अर्थ—अनादि कालसे इस संसारमे भ्रमण करनेवाले जीवने जो दुःखोका समूह भोगा है उसका नाश करनेमे मुनिव्रत—सकल चारित्र ही समर्थ है अन्य कुछ नही। इसलिये पृथिवीपर अपनी शक्तिके अनुसार वही मुनिव्रत धारण करनेके योग्य है, भक्तिपूर्वक वही मुनिव्रत मनसे चिन्तनीय है वही मुनिव्रत वचनसे कहने योग्य है और वही मुनिव्रत शरीरसे—कायसे करने योग्य है ॥ ११६-११७ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणि ग्रन्थमे महाव्रतोका
वर्णन करनेवाला तृतीय प्रकाश पूर्ण हुआ।

चतुर्थ प्रकाश

पञ्चसमित्यधिकार

मङ्गलाचरण

येनासिना ध्यानमयेन भिन्ना कर्मारिसेना महती विदीर्णा।
स वीरनाथो गुणिभिः सनाथो मोक्षस्य लाभाय सदा ममास्तु ॥ १ ॥

अर्थ—जिन्होने ध्यान रूप कृपाणके द्वारा बहुत बडी कर्म शत्रुओकी सेनाको छिन्न-भिन्न तथा विदीर्ण कर दिया एव जो अनेक गुणीजनो गणधरादिसे सहित थे वे भगवान् महावीर मेरे मोक्ष-प्राप्तिके लिये हो ॥ १ ॥

आगे महाव्रतोकी रक्षाके लिये समितियोका वर्णन करते हैं—

यथा कृषीवलाः क्षेत्र-रक्षार्थं परितो वृती।
कुर्वन्ति व्रतरक्षार्थं समितीश्च तथर्षय ॥ २ ॥
ईर्याभाषादिभेदेन समितिः पञ्चधा मता।
अथासा लक्षणं किंचिद् वर्णयामि यथागमम् ॥ ३ ॥

अर्थ—जिस प्रकार किसान खेतकी रक्षाके लिये चारो ओरसे

वृति—कांटे आदिकी बाड लगाते हैं उसी प्रकार मुनि व्रतोंकी रक्षाके लिये समितियोको धारण करते है। ईर्या भाषा आदिके भेदसे समिति पाँच प्रकारकी मानी गई हैं अर्थात् समितिके ईर्या, भाषा, एषण, आदान निक्षेपण और व्युत्सर्ग (प्रतिष्ठापना) ये पाँच भेद हैं। अब आगमके अनुसार इनका कुछ लक्षण दिखाता हूँ॥ २-३॥

अब सर्वप्रथम ईर्या समितिका वर्णन करते हैं—

प्रमादरहिता वृत्तिः समितिः सन्निरूप्यते।
चर्यार्थं तीर्थयात्रार्थं गुरूणां वन्दनाय च॥ ४॥
जिनधर्मप्रसाराय मुनीनां गमनं भवेत्।
तडागारामशैलादिदर्शनाय न साधवः॥ ५॥
विहरन्ति कदाचिद् वै लौकिकानन्दहेतवे।
रजन्यां तमसाछन्नमार्गायां न व्रजन्ति ते॥ ६॥
सति सूर्योदये मार्गे दृष्टतत्रस्थवस्तुके।
नृगवाश्वखरादीनां यातायातविमर्दिते॥ ७॥
हरिद्घासाद्यसंकीर्णे साधवो विहरन्ति हि।
दण्डप्रमितभूभागं पश्यन्तः संव्रजन्ति ते॥ ८॥
न मन्दं नातिशीघ्रं च विहरन्ति मुनीश्वराः।
शौचबाधानिवृत्यर्थं रात्रौ चेद् गमनं भवेत्॥ ९॥
दिवाविलोकिते स्थाने पिच्छेन परिमार्जिते।
बाधांनिवर्तयेत्साधुः करपृष्ठपरीक्षिते॥ १०॥
क्षुद्रजन्तुकरक्षार्थं निष्प्रमादं व्रजन्ति ते।
सम्यग् विलोकिते क्षेत्रे साधूनां विहृतिर्भवेत्॥ ११॥
पादनिक्षेपवेलायां कश्चन क्षुद्रजन्तुकः।
आगत्य चेन्मृतिं यायान्न साधोस्तन्निमित्तकः॥ १२॥
सूक्ष्मोऽपि दर्शितो बन्ध आचार्यैर्हि जिनागमे।
प्रमाद एव बन्धस्य यतो हेतुः प्रदर्शितः॥ १३॥
पद्भ्यामेव साधूनां विहारो जिनसम्मतः।
अतो यात्रादिकव्याजाद् गृह्णानः शिबिकाश्रयम्॥ १४॥
खण्डयत्येव स्वस्येर्यासमितिं नात्र संशयः।
भवेन्निःश्रेयसप्राप्तिर्निर्दोषाचरणेन हि॥ १५॥

अर्थ—प्रमादसे रहित वृत्ति समिति कहलाती है। चर्या, तीर्थयात्रा, गुरु-वन्दना और जिनधर्मके प्रसारके लिये मुनियोका गमन होता है। तालाब, बाग तथा पर्वत आदिको देखनेके लिये तथा लौकिक आनन्दके

निमित्त निश्चयसे मुनि कभी विहार नही करते हैं। अन्धकारसे जहाँ मार्ग आच्छन्न-व्याप्त रहता है ऐसी रात्रिमे साधु विहार नही करते। सूर्योदय होनेपर, जिसमे स्थित वस्तुएँ दिख गई है, मनुष्य, गाय, घोडा तथा गधा आदिके यातायातसे जो क्षुण्ण—विमर्दित हो गया है एवं जो हरी घास आदिसे व्याप्त नही है ऐसे मार्गमे साधु विहार करते हैं। वे मुनिराज दण्ड—चार हाथ प्रमित भूप्रदेशको देखते हुए चलते हैं, न अत्यन्त धीरे-धीरे चलते हैं और न अत्यन्त शीघ्र। शौचादिक बाधाकी निवृत्तिके लिये यदि रातमे जाना होता है तो दिनमे देखे हुए, पीछीसे परिमार्जित और हाथके पृष्ठ भागसे परीक्षित स्थानमे बाधाकी निवृत्ति करते है। वे क्षुद्रजीवोकी रक्षाके लिये प्रमाद रहित होकर चलते हैं। साधुओका विहार अच्छी तरह देखे हुए स्थानमे होता है। पैर रखते समय यदि कोई क्षुद्रजीव आकर मर जाय तो साधुको उसके निमित्तसे होनेवाला थोडा भी बन्ध आचार्योंने जिनागममे नही बताया है क्योकि बन्धका हेतु प्रमाद ही बताया गया है। साधुओका पैदल विहार ही जिनसम्मत है। अत यात्रादिकके व्याजसे पालकीका आश्रय करनेवाला साधु अपनी ईर्या समितिको नियमसे खण्डित करता है, इसमे सदेह नही है। परमार्थसे मोक्षकी प्राप्ति निर्दोष आचरणसे ही होती है ॥ ४-१५ ॥*

अब भाषा समितिका स्वरूप कहते है—

अथात्र क्रियते चर्चा भाषासमितिलक्षणः।
योऽसत्य वाक्परित्यागो जातः सत्यमहाव्रते ॥ १६ ॥
रक्षार्थं तस्य भाषायाः समिति· सम्प्रयुज्यते।
भाषासमितिसंधारी मुनिराजो निरन्तरम् ॥ १७ ॥
हितां ब्रूते मितां ब्रूते प्रिया ब्रूते च भारतीम्।
तस्य वदनचन्द्राद्यो निःसृतो वचनोच्चय· ॥ १८ ॥
पीयूषनिर्झर इव श्रोत्रानन्दं ददाति सः।
वागेवात्र महीलोकेऽन्योन्यप्रीतिविधायिनी ॥ १९ ॥
काकप्रियरव श्रुत्वा पिकस्य मधुरां कुहूम्।
उभयोरन्तर वेत्ति भाषाविज्ञानशोभित· ॥ २० ॥
सधर्मभिः कृतालापो भाषासमितिधारकः।
धर्मपक्ष दृढीकर्तुं बह्वपि वक्ति जातुचित् ॥ २१ ॥

---

* विशेष—सल्लेखनाके लिये निर्यापकाचार्य के पास पहुँचनेके लिये अशक्ति वश शिविकाका आश्रय लिया जा सकता है।

भाषायाः सौष्ठवं प्राप्य यः स्वच्छन्दं प्रभाषते ।
निरर्थकं भवेत्तस्य भाषायाः सौष्ठवं महत् ॥ २२ ॥

एकस्य वचनं श्रुत्वा लोके युद्धः प्रजायते ।
एकस्य वचनं श्रुत्वा युद्धशान्तिः प्रजायते ॥ २३ ॥

एकस्य वचनं श्रोतुं समायान्ति सहस्रशः ।
मर्त्या, एकस्य संश्रोतुं द्वित्रास्तिष्ठन्ति मानवाः ॥ २४ ॥

व्यर्थं वचनविस्तार विदधाति च यो नरः ।
अल्पायोऽधिक दानीव विषादं लभते स वै ॥ २५ ॥

दोलेव भारती यस्य भवतीह चलाचला ।
प्रत्ययं तस्य मर्त्यस्य को नु कुर्याद् धरातले ॥ २६ ॥

स्वप्रतिष्ठां स्थिरीकर्तुं भूमिलोके महस्विनाम् ।
भाषासमितिवन्नान्यत् साधन वर्तते क्वचित् ॥ २७ ॥

अर्थ—अब यहाँ भाषा समितिके लक्षणकी चर्चाकी जाती है। सत्यमहाव्रतमे जो असत्यवचनका परित्याग हुआ था उसकी रक्षाके लिये भाषा समितिका सुप्रयोग किया जाता है। भाषा समितिके धारक मुनिराज सदा हित, मित और प्रिय वाणी बोलते हैं। उनके मुखचन्द्रसे जो वचन समूह निकलता है वह अमृतके झिरनेके समान श्रोताओको आनन्द देता है। इस पृथिवी लोकमे वाणी ही परस्पर प्रीति करानेवाली है। कौएका अप्रिय शब्द और कोयलकी मीठी कुहू सुनकर भाषा विज्ञानसे शोभित मनुष्य दोनोका अन्तर जान लेता है। सधर्मीजनोके साथ वार्तालाप करनेवाला भाषासमितिका धारक मुनि धर्मका पक्ष दृढ करनेके लिये कभी बहुत भी बोलता है। भाषाके सौष्ठव स्पष्टताको प्राप्तकर जो स्वच्छन्द रूपसे बोलता है उसकी भाषाका बहुत भारी सौष्ठव निरर्थक होता है। एकका वचन सुनकर लोकमे युद्ध भडक उठता है और एकका वचन सुनकर युद्ध शान्त हो जाता है। एकका वचन सुननेके लिये हजारो मनुष्य आते हैं और एकका वचन सुननेके लिये दो तीन ही मनुष्य बैठते हैं। जो मनुष्य व्यर्थका वचन विस्तार करता है वह अल्प आयवाला होकर अधिक दान करनेवालेके समान विषादको प्राप्त होता है। इस जगत्में जिसकी वाणी दोलाके समान अत्यन्त चञ्चल है उस मनुष्यका विश्वास भूतलपर कौन करेगा? अर्थात् कोई नही। महस्वी-तेजस्वी मनुष्योको पृथिवीपर अपनी

प्रतिष्ठा स्थिर रखनेके लिये भाषासमितिके समान कहीं दूसरा साधन नहीं है ॥ १६-२७ ॥

आगे एषणा समितिकी चर्चा करते हैं—

अथैषणा समित्याश्च कापि चर्चा विधीयते ।
एषणाभुक्तिरित्यर्थस्तस्यां या सावधानता ॥ २८ ॥
एषणासमितिः प्रोक्ता सा विज्ञात-जिनागमैः ।
औदारिकमिदं वर्ष्म विना भुक्तिं न तिष्ठति ॥ २९ ॥
अतस्तस्य सुरक्षार्थमाहारः प्रविधीयते ।
दिवसे ह्येकवारं यः स्थितः सन् पाणिपात्रके ॥ ३० ॥
यथाविधि यथाप्राप्तमाहारं विदधाति सः ।
एषणासमितिः सैषा मुनिभिर्विनिरूपिता ॥ ३१ ॥
ईदृशो हि ममाहारो दीयेत श्रावकैर्जनैः ।
एवं वाञ्छा न तेषां स्याज्जैनाचारतपस्विनाम् ॥ ३२ ॥
अन्तराये समायाते विषीदन्ति न साधवः ।
स्वात्मध्यानपराः सन्तः कुर्वते कर्मनिर्जराम् ॥ ३३ ॥
साधवः सुकुलीनानां जैनाचारस्य धारिणाम् ।
गृहेषु नवधा भक्त्या प्रगृहीताः प्रभुञ्जते ॥ ३४ ॥
कथिता एषणादोषाश्चत्वारिंशत् षडुत्तराः ।
वर्जनीयाः सदा ह्येते द्वात्रिंशच्चान्तरायकाः ॥ ३५ ॥

अर्थ—अब एषणा समितिकी कुछ चर्चाकी जाती है। एषणाका अर्थ भोजन है, उसमे जो सावधानता है वह जिनागमके ज्ञाता पुरुषो द्वारा एषणा समिति कही गई है। यह औदारिक शरीर आहारके बिना नही ठहरता इसलिये उसकी सुरक्षाके लिये आहार किया जाता है। जो दिनमे एकबार खडे होकर पाणिपात्रमे विधिपूर्वक प्राप्त हुए आहारको ग्रहण करता है उसकी यह विधि मुनियो द्वारा एषणा समिति कही गई है। सरस, नीरस, कडुआ अथवा मीठा जैसा आहार प्राप्त होता है साधु उसीमे सन्तुष्ट रहते हैं। श्रावक लोग मुझे ऐसा आहार देते तो ठीक होता, ऐसी इच्छा जैनाचारके तपस्वियोके नही होती। अन्तराय आनेपर साधु विषाद नहीं करते हैं किन्तु स्वात्मध्यानमे तत्पर रहते हुए कर्मोंकी निर्जरा करते है। साधु उत्तम कुलीन तथा जैनाचारके धारक श्रावकोके घरमे नवधाभक्तिसे पडगाहे जानेपर आहार करते हैं। एषणा सम्बन्धी छियालीस दोष और बत्तीस अन्तराय

कहे गये हैं।[1] ये सब छोडने योग्य हैं अर्थात् इन्हें टालकर आहार करना चाहिये ॥ २८-३५ ॥

आगे माधुकरी आदि पाँच वृत्तियोका वर्णन करते हुए पहले माधुकरी वृत्तिका कथन करते हैं—

माधुकर्यादिवृत्तीनां धारका मुनिपुङ्गवाः।
विरक्ताः स्वशरीरेभ्यो विचरन्ति महीतले ॥ ३६ ॥
यथा मधुकरः पुष्पाद् रसं गृह्णन् तदुद्भवम्।
बाधां न कुरुते पुष्पं तथा साधुर्गृहस्थतः ॥ ३७ ॥
आहार स्वेप्सितं गृह्णन् न तं पीडयति क्वचित्।
एषा माधुकरीवृत्तिर्गदिता चरणागमे ॥ ३८ ॥
एषैव भ्रामरीवृत्तिः कथ्यतेऽपरनामतः।

अर्थ—माधुकरी आदि वृत्तियोको धारण करनेवाले मुनिराज अपने शरीरसे विरक्त हो पृथिवीतलपर विहार करते हैं। जिस प्रकार मधुकर—भ्रमर फूलसे उसके रसको ग्रहण करता हुआ फूलको बाधा नही करता उसी प्रकार साधु गृहस्थसे अपने योग्य शुद्ध आहार लेते हुए गृहस्थको पीडित नही करते। यह चरणानुयोगके शास्त्रोमे माधुकरी वृत्ति कही गई है, यही वृत्ति दूसरे नामसे भ्रामरीवृत्ति भी कही जाती है ॥ ३६-३८ ॥

अब गोचरीवृत्तिका स्वरूप कहते हैं—

यथा गौर्घाससम्पूलं ददतं नैव पश्यति ॥ ३९ ॥
पश्यति घाससम्पूलं तथायं हि मुनीश्वरः।
ग्रासं पश्यति पाणिस्थं ददतं नैव पश्यति ॥ ४० ॥
गृहिणां गृहमध्ये या रागवर्धकभूतयः।
ताः प्रत्यस्य न दृष्टिः स्यात् स्वात्मन्येव हि सा भवेत् ॥ ४१ ॥
एषा गोचरीवृत्तिः कथ्यते सूरिसत्तमैः।
अहो वैराग्यमाहात्म्यं गदितुं केन शक्यते ॥ ४२ ॥

अर्थ—जिस प्रकार गाय घासका पूला देनेवालेको नही देखती किन्तु घासके पूलको देखती है उसी प्रकार वे मुनिराज पाणिपात्रमे स्थित ग्रासको देखते हैं, ग्रास देनेवालेको नही। गृहस्थोके घरमे जो रागवर्द्धक सम्पदा है उसकी ओर इनकी दृष्टि नही रहती, निश्चयसे उनकी दृष्टि

---

१. छयालीस दोष और बत्तीस अन्तरायोका वर्णन परिशिष्टमे देखें।

अपने स्वरूपमें ही रहती है। श्रेष्ठ आचार्योंके द्वारा यह गोचरीवृत्ति कही जाती है। अहो! वैराग्यकी महिमा कहनेके लिये कौन समर्थ है? ॥ ३९-४२ ॥

आगे अग्निप्रशमनीवृत्ति कहते हैं—

कस्यचिद् भवने वह्निर्ज्वालासन्ततिरुत्थिता।
तस्याः प्रशमने हेतुर्जलधारैव मृग्यते ॥ ४३ ॥
तज्जलं मधुरं वा स्यात्क्षारं वा च भवेत् क्वचित्।
एवं ह्युदरमध्येऽपि क्षुधाग्निर्वर्धते चिरात् ॥ ४४ ॥
तस्य प्रशमने हेतुः पाणिस्था ग्राससन्ततिः।
सरसा नीरसा सा स्यादिति चिन्ता न विद्यते ॥ ४५ ॥
अग्निप्रशमनी नाम वृत्तिरेषा निगद्यते।

अर्थ—यदि किसीके मकानमे अग्नि-ज्वालाओंका समूह उठा है तो उसे शान्त करनेके लिये जलधारा ही खोजी जाती है, कहीं वह जल मीठा होता है और कहीं खारा भी हो सकता है। इसी प्रकार उदरके भीतर क्षुधारूपी अग्नि चिरकालसे बढ रही है। उसे शान्त करनेके लिये हाथमे स्थित ग्रासोंका समूह ही कारण है। वह ग्रास समूह सरस हो या नीरस, इसका विचार नहीं रहता। यह अग्नि प्रशमनी-वृत्ति कही जाती है ॥ ४३-४५ ॥

अब गर्तपूरण वृत्तिको कहते है—

गृहाङ्गणगतो गर्तो यथा केनापि पूर्यते ॥ ४६ ॥
तथायमोदरो गर्तः सरसैर्नीरसैरपि।
ग्रासैः पूरयितुं शक्यो विरक्तस्य महामुने. ॥ ४७ ॥
गर्तपूरणनाम्नीयं प्रशस्ता वृत्तिरिष्यते।

अर्थ—जिस प्रकार घरके आँगनका गर्त किसी साधारण मिट्टी आदि-के द्वारा भर दिया जाता है उसी प्रकार विरक्त महामुनिके उदरका गर्त सरस अथवा नीरस ग्रासोंके द्वारा भर दिया जाता है अर्थात् मुनि-राज सरस और नीरस आहारमे रागद्वेष नहीं करते। यह गर्तपूरण नामकी उत्तम वृत्ति मानी जाती है ॥ ४६-४७ ॥

आगे अक्षम्रक्षण वृत्तिका निरूपण करते हैं—

अक्षस्य म्रक्षणे जाते गन्त्री लक्ष्यं प्रगच्छति ॥ ४८ ॥

यथा तथाविदेहोऽयं शकटाभा प्रगच्छति ।
मोक्षाख्यपत्तनं यावदाहारो ऽक्षणोपमः ॥ ४९ ॥
एवाक्षम्रक्षणीवृत्तिः प्रशस्या चरणागमे ।
इत्थ दीक्षाधरैर्नित्यं सुरक्ष्याः पञ्चवृत्तयः ॥ ५० ॥
स्वस्याहारनिमित्तं यः सार्धं गृह्णाति साधनम् ।
एषणासमितिस्तस्य चिन्तनीयास्ति भूतले ॥ ५१ ॥

अर्थ—जिस प्रकार अक्षपर (चाकके छिद्रमें स्थित भौंरापर) म्रक्षण-ओगन लगा देनेसे गाडी अपने लक्ष्य स्थान तक चली जाती है उसी प्रकार गाडीके समान मुनिका यह शरीर मोक्षरूपी नगरको ओर जा रहा है, आहार इसके लिये ओगनके समान है। चरणानुयोगमे यह अक्षम्रक्षण-वृत्ति प्रशंसनीय मानी गई है। इस प्रकार दीक्षाके धारक मुनियोको इन पाच वृत्तियोका अच्छी तरह पालन करना चाहिये। जो मुनि अपने आहारके निमित्त साधन-सामग्री चौका आदि साथ लेकर चलते हैं उनकी ऐषणा समिति पृथिवीतलपर चिन्तनीय है ॥ ४८-५१ ॥

अब आदान-निक्षेपण समितिकी चर्चा करते हैं—

शौचोपकरणं कुण्ठी पिच्छं संयमसाधनम् ।
ज्ञानोपकरणं शास्त्रमिति साधुपरिग्रहः ॥ ५२ ॥
आदाने क्षेपणे चेषां या साधोः सावधानता ।
सैवाह्यादाननिक्षेपसमितिः परिकथ्यते ॥ ५३ ॥
बलाहकावलीं दृष्ट्वा गगने श्यामलप्रभाम् ।
मध्येमध्ये च गर्जन्तीं विद्युत्स्फर्तिचमत्कृताम् ॥ ५४ ॥
पिच्छपङ्क्ति समास्फाल्य नृत्यन्त केकिनो वने ।
स्वयमुज्झन्ति पिच्छानि तान्यादाय वनेचराः ॥ ५५ ॥
वितरन्ति मनुष्येभ्यस्ते चादाय तपस्विनाम् ।
पिच्छिकानिर्मितेर्हेतोः सङ्घेषुप्रेषयन्ति च ॥ ५६ ॥
तेभ्यः पिच्छस्य निर्माणं स्वयं कुर्वन्ति साधवः ।
पिच्छिकानां मृदुस्पर्शो जीवानां नैव पीडकः ॥ ५७ ॥
अतो दिगम्बरः साधुः स्वीकुरुते तमेव हि ।
गृध्राणां च बकानां च पक्षाः पिच्छतया क्वचित् ॥ ५८ ॥
गृहीतः केन चिज्जातु न तत्पक्षः सनातनः ।
नारिकेलेन काष्ठेन कुण्डी या हि विधीयते ॥ ५९ ॥

सैवात्र साधुभिर्ग्राह्या नैव धातुविनिर्मिता।
अल्पमूल्या गृहस्थानां या वा नैवोपकारिणी ॥ ६० ॥
तस्याहरणसम्भीतिर्न स्याज्जातु तपस्विनाम्।
एकद्वित्रीणि शास्त्राणि साधूनां हि तपस्विनाम् ॥ ६१ ॥
ज्ञानोपकरणत्वेन न निषिद्धानि सूरिभिः।
चातुर्मासस्य वेलायां बहुशास्त्रावलोडनम् ॥ ६२ ॥
न निषिद्धं मुनीन्द्राणां तत्स्वामित्वविवर्जनात्।
ग्रन्थनिर्माणवेलायां तत्सहयोगकारिणाम् ॥ ६३ ॥
पठनं बहुशास्त्राणां विधेय ननु वर्तते।
ज्ञानस्य वर्धनं शास्त्रं ज्ञानोपकरणं मतम् ॥ ६४ ॥
एषामादानवेलायां निक्षेपावसरे तथा।
जीवबाधा न कर्तव्या. स्वात्मकल्याणवाञ्छिभिः ॥ ६५ ॥

अर्थ—शौचका उपकरण कमण्डलु, संयमका साधन पिच्छी और ज्ञानका उपकरण शास्त्र, यही साधुका परिग्रह है। इनके उठाने और रखनेमे साधुकी जो सावधानता है वही आदान-निक्षेपण समिति कहलाती है। आकाशमे काली काली, बीच बीचमे गरजती और बिजलीकी कौंधसे चमकती घनघटाको देखकर मयूर वनमे अपनी पिच्छावलीको फैलाकर नृत्य करते हुए पंखोको स्वय छोडते है। वनेचर-भील आदि उन्हे लेकर मनुष्योको देते हैं, वे उन्हे लेकर पिच्छिकाएँ बनानेके लिये साधुओके सघमे भेजते है। उन पंखोसे साधु स्वय ही पिच्छिकाएँ बनाते है। पिच्छिकाओका कोमल स्पर्श जीवोको पीडा देनवाला नही है, अतः दिगम्बर साधु उसी मयूर पिच्छको ग्रहण करते हैं। कहीपर किन्हीने परिस्थितिवश गोध और बगलोके पाख भी पिछी रूपसे स्वीकृत किये हैं पर वह पक्ष समीचीन नही है।

नारियल या काठसे जो कमण्डलु बनाया जाता है वही साधुओ द्वारा ग्रहण करने योग्य है, धातुओसे निर्मित नही। जो अल्पमूल्य हो और गृहस्थोके काम आने वाला न हो ऐसा कमण्डलु ही ग्राह्य है क्योकि ऐसे कमण्डलुके चुराये जानेका भय साधुओंको नही होता।

तपस्वी साधु एक, दो या तीन शास्त्र साथमे रक्खे तो ज्ञानका उपकरण होनेसे आचार्योंने उनका निषेध नही किया है। चातुर्मासके समय बहुत शास्त्रोका आलोडन-देखना-संभालना मुनियोके लिये निषिद्ध नही, क्योकि उनके वे स्वामी नही होते। किसी मन्दिर या

सरस्वतीभवनमें संगृहीत शास्त्रोकी अपेक्षा यह कथन है। ग्रन्थनिर्माण-के समय उसके सहकारी बहुत शास्त्रोका पठन भी विधेय है—करने योग्य है। शास्त्र ज्ञानको बढाते हैं इसलिये ज्ञानोपकरण कहलाते हैं। आत्म-कल्याणके इच्छुक साधुओको इन सब उपकरणोंके उठाते और रखते समय जीवबाधा नही करना चाहिये ॥ ५२-६५॥

अब आगे व्युत्सर्ग समितिकी चर्चा करते हैं—

इतोऽग्रे सविधास्यामि व्युत्सर्गसमितेः कथाम्।
मलमूत्रादिबाधाया निवृत्तिर्जन्तुवर्जिते ॥ ६६ ॥
हरिद्घासाद्यसंकीर्णे ह्यनिरुद्धे तिरोहिते।
स्थाने निवर्तनीयास्ति विपिने विजनेऽपि वा ॥ ६७ ॥
मले मलस्य पातो नो विधातव्य कदाचन।
शौचालयेषु शौचस्य करण नोचित क्वचित् ॥ ६८ ॥
एषा शरीरवृत्तिर्हि करणीया शरीरिभिः।
जीवहिंसापरीहारे ध्यानं धेयं स्ववश्यतः ॥ ६९ ॥

अर्थ—इसके आगे व्युत्सर्ग समितिकी कथा करूंगा जो जीव-जन्तुओसे रहित हो, हरी घास आदिसे व्याप्त न हो, रुकावटसे रहित हो तथा तिरोहित—परदा सहित हो। ऐसे स्थानपर जगल अथवा निर्जन स्थलपर मलमूत्रादि बाधाकी निवृत्ति करना चाहिये। मलके ऊपर मल कभी नही पटकना चाहिये तथा शौचालयोमे शौच कही नही करना चाहिये। मलमूत्र त्याग, यह शरीरकी वृत्ति है अत. अवश्य करनी पडती है परन्तु जीवहिंसाके बचाव पर अवश्य ध्यान देना चाहिये ॥ ६६-६९ ॥

आगे समिति-अधिकारका समारोप करते है—

गृहीतव्रतेषु प्रदोषप्रसारो, भवत्यत्र लोके प्रमादप्रभावात्।
अतो दोषहान्युद्यतैर्भव्यलोकैः प्रमादे प्रहारो विधेयो व्रताढ्यैः ॥ ७० ॥

अर्थ—इस लोकमे गृहीतव्रतोके मध्य प्रमादके प्रभावसे दोषोका प्रसार होता है अर्थात् अनेक दोष लगते है अतः दोषोको नष्ट करनेके लिये उद्यत व्रती भव्य जीवोको प्रमादपर प्रहार करना चाहिये।

भावार्थ—प्रमादके परित्यागसे ही समितियोका पालन होता है और समितियोसे महाव्रतकी रक्षा होती है। अत. चलने, बोलने, आहार करने, रखने, उठाने और मलमूत्र छोड़नेमें प्रमादका त्याग करना चाहिये ॥ ७० ॥

आत्मबलवर्धनेन प्रमादमन्तर्गतं विहातुं ये ।
उद्यमशीला भुवने त एव भव्याः प्रमादरहिताः स्युः ॥ ७१ ॥

अर्थ—आत्मबलकी वृद्धि द्वारा जो भीतरी प्रमादको छोडनेके लिये प्रयत्नशील हैं, वे भव्य ही प्रमादरहित हो सकते है ॥ ७१ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे पञ्चसमितियोका
वर्णन करनेवाला समित्यधिकार नामका
चतुर्थ प्रकाश पूर्ण हुआ ।

पञ्चम प्रकाश

इन्द्रियविजयाधिकारः

मङ्गलाचरणम्

एते हृषीकहरयः संयमकविकापरप्रयोगेण ।
दान्ता यैर्हि समन्तात्ते मुनिराजाः सदा प्रणम्या मे ॥ १ ॥

अर्थ—जिन्होने संयम रूपी लगामके उत्कृष्ट प्रयोगसे इन इन्द्रिय-रूपी अश्वोका सब ओरसे दमन कर लिया है वे मुनिराज मेरे सदा प्रणाम करनेके योग्य हैं। तात्पर्य यह है कि मैं इन्द्रियविजयी साधुओको सदा प्रणाम करता हूँ ॥ १ ॥

आगे इन्द्रियविजय नामक मूलगुणोका वर्णन करता हूँ—

अथेन्द्रियजयं लक्ष्य कृत्वा किञ्चिद् वदाम्यहम् ।
अकृत्वाक्षजयं लोके स्याद् दीक्षाया विडम्बना ॥ २ ॥
हृषीकविषयाधीना लोका भ्राम्यन्ति सर्वतः ।
क्षितिमूले नभोमार्गे शैले सिन्धुतले तथा ॥ ३ ॥
कामिनीकोमलस्पर्शलालसा लम्पटा नराः ।
इहैव विविधापायानमुत्र श्वभ्रवेदनाः ॥ ४ ॥
सहन्ते नारका भूत्वा रावणवन्निरन्तरम् ।
यथा करेणुकुट्टिन्याः कायाकुलितचेतस. ॥ ५ ॥
धावमाना गजा गर्ते पतन्तः परतन्त्रताम् ।
प्राप्नुवन्ति महादुःख चिरं सीदन्ति च क्षितौ ॥ ६ ॥

तथा कामेन्द्रियाधीना मनुजा अत्र भूतले ।
विविधव्याधिमासाद्य मज्जन्ति भवसागरे ॥ ७ ॥
के के न पतिता लोके नारीसङ्गमुपाश्रिताः ।
अपारदुःखसम्भारे वितते भवसागरे ॥ ८ ॥

अर्थ—अब मैं इन्द्रियजयको लक्ष्यकर कुछ कहता हूँ क्योंकि इन्द्रिय-जय किये बिना लोकमे मुनि दीक्षाकी विडम्बना ही होती है। इन्द्रिय-विषयोंके अधीन मनुष्य लोकमे पृथिवीमूल—खान, आकाश-मार्ग, पर्वत और समुद्रके तलमे सब ओर भ्रमण करते हैं। स्त्रियोके कोमल स्पर्शको लालसा रखनेवाले कामी पुरुष इसी लोकमे नाना प्रकारके कष्ट सहते हैं और परभवमे नारकी बन रावणके समान निरन्तर दुःख भोगते हैं। जिस प्रकार कृत्रिम हस्तिनोके शरीरको स्पर्शके लिये आकुलित चित्त वाले हाथी दौडकर गड्ढेमे पड परतन्त्रता रूप महादु.खको प्राप्त होते हैं तथा पृथिवीपर चिरकाल तक दुःखी रहते हैं उसी प्रकार कामेन्द्रियके अधीन मनुष्य इस भूतलपर नाना प्रकारको व्याधियोको पाकर ससार सागरमे मग्न होते है। लोकमे स्त्रियोका संग पाकर अपार दु.खके समूहसे युक्त विस्तृत भवसागरमे कौन-कौन पतित नही हुए हैं? अर्थात् सभी हुए है ॥ २-८ ॥

आगे जिह्वा-इन्द्रिय विजयका कथन करते हैं—

जिह्वेन्द्रियरसाधीनाः पाठीनाः पुष्टदेहिनः ।
यथा बन्धनमायान्ति प्राणहीना भवन्ति च ॥ ९ ॥
तथा जिह्वेन्द्रियाधीना मर्त्या मृत्युमुपागताः ।
दृश्यन्ते दूषिताहार-पीडिता जगतीतले ॥ १० ॥
केचित्तिक्तप्रिया लोके केचिच्च मधुरप्रियाः ।
केचित्क्षारप्रियाः सन्ति केचिदक्षारभोजिनः ॥ ११ ॥
विरुद्धाहारपाने च लब्धे ह्युद्भूतकोपनाः ।
कुर्वन्तः कलहं नित्यं खिन्नचित्ता भवन्ति हा ॥ १२ ॥
धन्यास्ते मुनयो लोके नीरसाहारकारिणः ।
आजीव त्यक्त मिष्टाशा आजीवं क्षारमोचिनः ॥ १३ ॥
आजीवमुष्णपानीयं विरसं संपिबन्ति च ।
आजीवं त्यक्तदुग्धा ये ह्याजीवं घृतमोचिनः ॥ १४ ॥
तेषां पुरो गृहस्थानां गार्हस्थ्य संकटाततम् ।
मेरुसर्षपयोर्मध्ये यावदन्तरमस्ति हि ॥ १५ ॥

तावदन्तरमस्त्यत्र मुनीनां गृहिणां पुरः ।
चतुरङ्गुलमानेयं रसना प्रेरणी तथा ॥ १६ ॥
ददाति यादृश दुःखं न ततोऽन्यत्तु तादृशम् ।
हहो भव्यानयो रागं त्यक्त्वा त्वं हि सुखी भव ॥ १७ ॥

अर्थ—जिह्वा इन्द्रियके अधीन हुए पुष्ट शरीर वाले मच्छ जिस प्रकार बन्धनको प्राप्त हो मारे जाते हैं उसी प्रकार जिह्वा इन्द्रियके अधीन मनुष्य दूषित आहारसे पीडित हो पृथिवीतलपर मृत्युको प्राप्त होते देखे जाते हैं। जगत्मे कोई तिक्त प्रिय है—चिरपरा भोजन रुचिसे करते है, कोई मधुर भोजनको पसन्द करते है, कोई खारा भोजन अच्छा मानते है और कोई बिना नमकका भोजन करते है। कुछ लोग विरुद्ध आहार पानीके मिलने पर क्रुद्ध हो कलह करते हुए निरन्तर खिन्न चित्त रहते हैं। लोकमे वे मुनि धन्य हैं जो नीरस आहार करते है। किन्हीके जीवन पर्यन्तके लिये मिष्ठान्नका त्याग है, किन्हीके नमकका त्याग है, कोई नीरस गर्म पानी पीते है, कोई जीवन-पर्यन्तके लिये दूधका त्याग किये हैं और यावज्जीवन घी छोडे हुए है। उन मुनि-राजोके सामने गृहस्थोका गार्हस्थ्य जीवन सकटोसे भरा हुआ है। मेरु पर्वत और सरसोमे जितना अन्तर है उतना अन्तर मुनि और गृहस्थोके सामने है। चार अंगुल प्रमाण रसना इन्द्रिय तथा कामेन्द्रिय जैसा दु ख देती है वैसा दु ख उनसे भिन्न अन्य इन्द्रिया नही देती। आचार्य कहते हैं—हे भव्य! इन दोनो इन्द्रियो का राग छोड, तू सुखी हो जा ॥ ६-१७ ॥

आगे घ्राणेन्द्रिय जयका वर्णन करते है—

रक्तपीतारविन्दानां संचयेन समाचिते ।
विकसत्पुण्डरीकाणा मण्डलेन च मण्डिते ॥ १८ ॥
कञ्जकिञ्जल्कपीताभसलिले सलिलाशये ।
सौगन्ध्यमापिबन् गन्धलोलुपो भ्रमरोऽभ्रमन् ॥ १९ ॥
साय निमीलिते पद्मे ह्यासक्त्या सस्थितोऽभवत् ।
प्रातः सूर्योदये जाते पद्मे विकसिते सति ॥ २० ॥
क्षणादेवोत्पतिष्यामि स्वेष्टधामेति चिन्तयन् ।
रजन्याः प्रथमे भागे सलिल पातुमागतः ॥ २१ ॥
गज एको जलं पीत्वा पद्मिनीं तां चचर्व सः ।
भ्रमरः स्वविचारेण सह मृत्युमुपागतः ॥ २२ ॥
सौगन्ध्यलोभतो मृत्युं यथा भ्रमर आगतः ।
तथाय मनुजो लोभाद् विविधैः कष्टमश्नुते ॥ २३ ॥

इत्थं विचार्य निर्ग्रन्थो गन्धलोभं विमुञ्चति ।
स्वात्मन्येव रतो योगी परगन्ध न काङ्क्षति ॥ २४ ॥
दुर्गन्धे वा सुगन्धे वा घ्राणेन्द्रियजयी मुनिः ।
माध्यस्थ्यं याति वस्तूनां स्वरूपं चिन्तयन् सदा ॥ २५ ॥

अर्थ—लाल पीले कमलोके समूहसे व्याप्त खिलते हुए सफेद कमलोके समूहसे मणि और कमलोको केशरसे पीतवर्ण जलसे युक्त जलाशयमे सुगन्धिकाका पान करता हुआ गन्धका लोभो भ्रमर संध्याके समय निमोलित—सकुचित कमलमे यह विचार करता हुआ स्थित हो गया कि प्रातःकाल सूर्योदय होनेपर जब कमल खिलेगा तब मैं शीघ्र ही अपने इष्ट स्थानपर उड जाऊँगा। उधर रात्रिके प्रथम भागमे पानी पोनेके लिये एक हाथी आया और पानी पीकर उस कमलिनीको चबा गया। भ्रमर अपने विचारोके साथ मृत्युको प्राप्त हो गया। जिस प्रकार भ्रमर सुगन्धके लोभसे मृत्युको प्राप्त हुआ उसी प्रकार यह मनुष्य सुगन्धके लोभसे अनेक कष्टोको प्राप्त होता है। ऐसा विचारकर निर्ग्रन्थ मुनि गन्धका लोभ छोडते है। अपने आत्मस्वरूपमे रमण करने वाले योगी अन्य गन्धकी इच्छा नही करते। घ्राणेन्द्रिय-जयो मुनि वस्तुओके स्वरूपका विचार करते हुए दुर्गन्ध या सुगन्धमे माध्यस्थ्य भावको प्राप्त होते है ॥ १८-२५ ॥

आगे चक्षु-इन्द्रिय विजयका वर्णन करते हैं—

उज्ज्वलज्ज्योतिराकाङ्क्षी चक्षुर्विषयसंगतः ।
शलभो मृत्युमायाति यथायं मानवस्तथा ॥ २६ ॥
अय गौरो ह्ययं श्यामो रक्तोऽयं पीत एव स ।
एवं विकल्पजालेन गृहस्थाः सन्ति पीडिताः ॥ २७ ॥
गौराङ्गी रोचते मह्यं श्यामाङ्गी नैव रोचते ।
इत्थ विकल्पजालान्तः पतिता भविनो जनाः ॥ २८ ॥
रोषं तोष च बिभ्राणाः कुर्वते कर्मबन्धनम् ।
मुनयो वीतरागाद्या रागद्वेषबहिर्गताः ॥ २९ ॥
चिन्तयन्त्यात्मरूपं तु रूपगन्धाविवर्जितम् ।
आत्मध्यानरतानां किं रूपं कश्च वा रतः ॥ ३० ॥

अर्थ—उज्ज्वल ज्योतिको चाहने वाला, चक्षु विषयका लोभी पतंगा जिस प्रकार मृत्युको प्राप्त होता है उसी प्रकार यह मनुष्य भी चक्षु इन्द्रियके विषयका लोभी बन मृत्युको प्राप्त होता है। यह गौर वर्ण है

यह श्याम वर्ण है, यह लाल है और यह पीला है इस प्रकारके विकल्प, जालसे गृहस्थ पीडित है। मुझे गौर वर्ण स्त्री अच्छी लगती है और श्याम वर्ण स्त्री अच्छी नही लगती, इस प्रकारके विकल्प समूहके बीचमे पडे ससारी जीव रागद्वेषको धारण करते हुए कर्मबन्ध करते है परन्तु रागद्वेषसे रहित वीतराग मुनि, रूप तथा गन्ध आदिसे रहित आत्मस्वरूपका ध्यान करते है। आत्मध्यानमे लीन साधुओके लिये रूप क्या है और गन्ध क्या है ? अर्थात् कुछ नही ॥ २९-३० ॥

आगे कर्णेन्द्रिय-जय मूलगुणको चर्चा करते है—

वीणावेणुस्वरादीना रागो येषां न विद्यते।
खरोष्ट्रकादिशब्देषु द्वेषो येषा न जायते ॥ ३१ ॥
प्रशसाशब्दमाकर्ण्य हर्षो येषां न जायते।
निन्दाशब्दावली श्रुत्वा द्वेषो येषा न वर्तते ॥ ३२ ॥
त एव मुनयो धीराः श्रोत्राक्षजयिनो मताः।
यथा वीणारवं श्रुत्वा निश्चलतां गता मृगाः ॥ ३३ ॥
वधिकानां शरैर्भिन्ना म्रियन्ते काननेऽचिरात्।
तथा गीतप्रिया मर्त्या आसक्ता रम्यगीतिषु ॥ ३४ ॥
अन्योऽन्य कलहायन्ते म्रियन्ते च यदा कदा।
एकैकाक्षवशा जीवाः प्राणान्तमुपयान्ति चेत् ॥ ३५ ॥
तदा सर्वेन्द्रियाधीना लभन्ते त कथं न हि।
इत्थ विचार्य निर्ग्रन्था अक्षाणा जयिनोऽभवन् ॥ ३६ ॥
इष्टानिष्टप्रसङ्गेषु रागद्वेषौ न याति यः।
तमक्षजयिन साधु प्रणमामि पुनः पुनः ॥ ३७ ॥

अर्थ—जिन्हे वीणा और बाँसुरीके स्वर आदिका राग नही है और गर्दभ तथा ऊँट आदिके शब्दोमे जिन्हे द्वेष नही होता। प्रशसाका शब्द सुनकर जिन्हे हर्ष नही होता और निन्दाके शब्द सुनकर जिन्हे द्वेष नही होता वे धीर वीर मुनि ही कर्णेन्द्रिय-जयी माने गये है। जिस प्रकार वीणाका शब्द सुन स्थिरताको प्राप्त हुए हरिण बधिकोके वाणोसे विदीर्ण हो वनमे शीघ्र मारे जाते है उसी प्रकार सगीतके प्रेमी तथा मनोहर गीतोमे आसक्त मनुष्य परस्पर कलह करते और जब कभी मरते रहते है। एक-एक इन्द्रियके अधीन जीव जब मृत्युको प्राप्त होते है तब सभी इन्द्रियोके अधीन रहने वाले मनुष्य मृत्युको प्राप्त क्यो नही होगे ? ऐसा विचार कर निर्ग्रन्थ मुनि इन्द्रिय विजयी होते

हैं। जिनके इष्ट अनिष्ट प्रसंगोमे रागद्वेष नही है उन इन्द्रिय विजयो साधुओको मैं बार-बार प्रणाम करता हूँ॥ ३१-३७॥

आगे इन्द्रिय-विजय प्रकरणका समारोप करते हैं—

रागद्वेषौ यस्य नाशं प्रयातौ
नोत्पद्येते तोषरोषौ च यस्य।
सोऽयं साधुः प्राप्य निर्ग्रन्थवृत्तं
शुक्लध्यानात्कर्मनाशं करोति॥ ३८॥

अर्थ—जिसके रागद्वेष नाशको प्राप्त हो चुके हैं तथा जिसके तोष और रोष उत्पन्न नही होते वह साधु हो निर्ग्रन्थ चारित्र—दिगम्बर मुनि मुद्राको प्राप्तकर शुक्ल ध्यानसे कर्मोंका क्षय करता है॥ ३८॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे पञ्चेन्द्रियोंके विजयका वर्णन करनेवाला इन्द्रियजयाधिकार नामका पञ्चम प्रकाश पूर्ण हुआ।

षष्ठ प्रकाश

षडावश्यकाधिकारः

मङ्गलाचरण

सम्यक्त्वबोधामलवृत्तमूलो
मोक्षस्य मार्गो गदितो जिनेन्द्रैः।
तं प्राप्य ये मोक्षपुरं प्रयाता-
स्तान् मुक्तिकान्तान् प्रणमामि नित्यम्॥ १॥

अर्थ—जिनेन्द्र भगवान्‌ने सम्यग्दर्शन, सम्यक्-ज्ञान और निर्मल सम्यक्-चारित्ररूप मूलसे युक्त मोक्ष मार्ग कहा है। इसे प्राप्तकर जो मोक्ष नगरको प्राप्त हुए है उन मुक्तिकान्त सिद्ध परमेष्ठियोको मैं निरन्तर प्रणाम करता हूँ॥ १॥

आगे आवश्यक शब्दका निरुक्त अर्थ तथा उसके नाम कहते हैं—

अथावश्यककार्याणि साधूनां कथयाम्यहम्।
रागादीनां वशो यो न सोऽवशः कथ्यते जिनैः॥ २॥

अवशस्य मुनेः कार्यमावश्यं हि समुच्यते।
'क' प्रत्ययविधानेन तदेवावश्यक भवेत् ॥ ३ ॥

यद्वावश्य च यत् कृत्यं तदावश्यकमिष्यते।
समता वन्दना स्तोत्र प्रतिक्रमणमेव च ॥ ४ ॥

प्रत्याख्यान तनूत्सर्ग इत्येतानि च तानि षट्।
मुनयः श्रद्धया तानि कुर्वन्तीह दिने दिने ॥ ५ ॥

अर्थ—अब साधुओके आवश्यक कार्योंका कथन करता हूँ। जो रागादिकके वश नही है वह जिनेन्द्र भगवान्के द्वारा अवश कहा जाता है। अवश मुनिका जो कार्य है वह आवश्य कहलाता है तथा स्वार्थ मे 'क' प्रत्यय करनेसे आवश्यक शब्द होता है (**न वशः अवश., अवशस्येदम् आवश्यम् आवश्यमेव आवश्यकम्**) अथवा जो कार्य अवश्य ही करने योग्य है वह आवश्यक कहलाता है। समता, वन्दना, स्तोत्र स्तुति, प्रतिक्रमण, प्रत्याख्यान और कायोत्सर्ग ये वे छह आवश्यक कार्य हैं जिन्हे मुनि प्रतिदिन श्रद्धासे करते हैं ॥ २-५ ॥

आगे समता आवश्यकका वर्णन करते है—

इष्टानिष्टप्रसङ्गेषु माध्यस्थ्यं यत् तपस्विनाम्।
साम्यं तत् साधुभिर्ज्ञेय कर्मारातिविनाशनम् ॥ ६ ॥

साम्यभावस्य सिद्धयर्थं साधुरेवं विचिन्तयेत्।
पुनः पुनश्चिन्तनेन विचारः सुस्थिरो भवेत् ॥ ७ ॥

अर्थ—इष्ट-अनिष्ट—अनुकूल प्रतिकूल प्रसङ्गोमे साधुओका जो मध्यस्थ भाव है उसे साधुओको साम्यभाव—समता जानना चाहिये। यह साम्यभाव कर्मरूप शत्रुओका नाश करने वाला है। साम्यभावकी सिद्धिके लिये साधुको ऐसा चिन्तन करना चाहिये क्योकि बार-बार चिन्तन करनेसे विचार अत्यन्त स्थिर—दृढ हो जाता है ॥ ६-७ ॥

जीवे जीवे सन्ति मे साम्यभावा:
सर्वे जीवाः सन्तु ये साम्ययुक्ताः।
आर्त्तंरौद्रं ध्यानयुग्म विहाय
कुर्वे सम्यग्भावना साम्यरूपाम् ॥ ८ ॥

पृथ्वीतोये वह्निवायू च वृक्षो
युग्माक्षाद्या सन्ति ये जीवभेदाः।

ते मे सर्वे क्षान्तियुक्ता भवन्तु
क्षान्त्या तुल्यं नास्ति रत्नं यदत्र ॥ ९ ॥

दुःखे सौख्ये बन्धुवर्गे रिपौ वा
स्वर्णे तार्णे वा गृहे प्रेतगेहे।
मृत्यूत्पत्त्योर्वा समन्ताज् जिनेन्दो
मध्यस्थं मे मानसं साम्प्रतं स्यात् ॥ १० ॥

माता तातः पुत्रमित्राणि बन्धु-
र्भार्याश्यालः स्वामिनः सेवकाद्याः।
सर्वे भिन्नाश्चिच्चमत्कारमात्रा-
दस्मद्रूपाच्चिच्चमत्कार शून्याः ॥ ११ ॥

मोहध्वान्तेनावृतोद्बोधचक्षुः
स्वात्माकारं न स्म पश्यामि जातु।
अद्योद्भिन्नज्योतिरश्मिप्रजातः
स्वात्माकारं तेन पश्यामि सम्यक् ॥ १२ ॥

रागद्वेषौ निराकृत्य चित्त कृत्वा च सुस्थिरम्।
सामायिक प्रकर्तव्यं कृतिकर्मपुरस्सरम् ॥ १३ ॥

अर्थ—जीव-जीवपर—प्रत्येक जीवपर मेरा साम्यभाव है, सब जीव भी मुझपर साम्यभावसे युक्त होवे। आर्त्त और रौद्र इन दोनो ध्यानोको छोडकर मैं साम्यभावरूप सम्यग्भावना करता हूँ। पृथिवी, जल, अग्नि, वायु, वनस्पति तथा द्वीन्द्रियादिक जो जीवोके भेद हैं वे सब मुझपर क्षमाभावसे युक्त हो क्योकि इस जगत्मे क्षम के तुल्य दूसरा रत्न नही है। दुःखमे, सुखमे, बन्धु वर्गमे, शत्रुमे, सुवर्णमे, तृण, समूहमे, महलमे, श्मशानमे, मृत्युमे और जन्ममे हे जिनचन्द्र! आपके प्रसादसे मेरा मन इस समय मध्यस्थ भावसे युक्त हो। माता, पिता, पुत्र, मित्र, बन्धु, भार्या, साले, स्वामी और सेवक आदि चैतन्य चमत्कारसे शून्य हैं तथा चैतन्य चमत्कार रूप मेरे स्वरूपसे भिन्न है। मेरा ज्ञानरूपी चक्षु मोहरूपी अन्धकारसे आच्छादित था इसलिये मैं आत्मस्वरूपको नही देख सका। आज मेरी ज्ञान ज्योति उद्भिन्न—प्रकट हुई है, इसलिये मैं अपने आत्माके स्वरूपको अच्छी तरह देख रहा हू।

रागद्वेषको दूर कर तथा चित्तको स्थिर कर कृतिकर्म—आवर्त तथा नति पूर्वक यथा समय सामायिक करना चाहिये ॥ ८-१३ ॥

आगे वन्दना नामक आवश्यकका वर्णन करते हैं—

चतुर्विंशतितीर्थेशामेकस्य स्तवनं यदा।
क्रियते साधुसन्तत्या तदा सा वन्दना स्मृता ॥ १४ ॥

अर्थ—साधु समूह द्वारा जब चौबीस तीर्थङ्करोमेसे किसी एक तीर्थङ्करकी स्तुतिकी जाती है तब वह वन्दना नामक स्तवन माना गया है ॥ १४ ॥

विशेष—इस सदर्भमे कषायपाहुड, प्रथम भाग, पृष्ठ १०२-१०३ पर दिया गया शंका समाधान विशिष्ट रुचिकर है—

'एयस्स तित्थयरस्स ममसण वदणा णाम। एक्कजिणजिणालय वंदणा ण कम्मक्खय कुणइ, सेसजिण जिणालयच्चा सण दुवारेणुप्पण्णकम्मबंधहेउत्तादो। ण तस्स मोक्खो जइणत्तं वा, पक्खवायदूसियस्स णाणचरणणिबंधणसम्मत्ताभावादो तदो एगस्स णमसणमणुववण्ण त्ति'।

शंका—एक जिन और एक जिनालयकी वन्दना कर्मोका क्षय नही कर सकती क्योकि इससे शेष जिन और जिनालयोको आसादना—अपमान होता है। इस आसादनासे अशुभ कर्मोका बन्ध होता है। इसके सिवाय एकको वंदना करने वालेको मोक्ष और जैनत्वकी प्राप्ति नही हो सकती। पक्षपातसे दूषित मनुष्यके ज्ञान और चारित्रके कारणभूत सम्यग्दर्शनका अभाव है, अत एक जिन या जिनालयको नमस्काररूप वन्दना नही करनी चाहिये।

एत्थ परिहारो वुच्चदे—ण ताव पक्खवाओ अत्थि, एक्कं चेव जिण जिणालयं वा वदामि त्ति णियमाभावादो। ण च सेस जिणजिणालयाण वदणा ण कया चेव, अणतणाणदंसणविरियसुहादिदुवारेण एयत्तमावण्णेसु अणंतेसु जिणेसु एयवंदणाय सव्वेसि पि वंदणुवत्तीदो। एवं संते ण च चउबीसत्थयम्मि वंदणाए अतब्भावो होदि, दव्वट्ठिय पज्जवट्ठियणयाणमेयत्तविरोहादो। ण च सव्वो पक्खवाओ असुह कम्मबध हेऊ चेवेत्ति णियमो अत्थि, खीणमोहजिणविसयपक्खवायम्मि तदणुवलभादो। एग जिणवदणाफलेण समाणफलत्तादो ण सेसजिण वंदणा फलवंता, तदो सेसजिणवंदणासु अहियफलाणुवलंभादो एक्कस्स चेव वंदणा कायव्वा, अणंतेसु जिणेसु अक्कमेण छदुमत्थुवयोग पउत्तीए विसेसपरूवणाए असभवादो वा एक्कस्सेव जिणस्स वंदणा कायव्वा त्ति ण एसो वि एयंग्गहो कायव्वो, एयंतावहारणस्स सव्वहा दुण्णयत्तप्पसंगादो। तम्हा एव विह विप्पडिवत्तिणिरायरण

मुहेण एय जिणवंदणाए णिरवज्जभावजाणावण दुवारेण वंदणा विहाण तप्फलाणं च परूवणं कुणइ त्ति वंदणाए कलव्वं ससमओ।

समाधान—उपर्युक्त शकाका परिहार करते हैं—एक जिन या जिनालयकी वन्दना करनेसे पक्षपात नही होगा क्योकि वन्दना करनेवालेके ऐसी प्रतिज्ञारूप नियम नही पाया जाता कि मैं एक जिण या जिनालयकी वन्दना करूंगा तथा ऐसा करनेसे शेष जिन और जिनालयोको वन्दना नही की, ऐसा नही है। क्योकि अनन्तज्ञान दर्शनवीर्य, सुख आदिके द्वारा सब एकत्वको प्राप्त है अत॰ एकको वन्दना करनेसे सबकी वन्दना हो जाती है। यद्यपि ऐसा है तो भी चतुर्विंशति स्तवमे वन्दनाका अन्तर्भाव नही होता क्योकि द्रव्यार्थिक और पर्यायार्थिक नयका एकत्व—अभेद माननेमे विरोध आता है। फिर सभी पक्षपात अशुभकर्म बन्धका हेतु भी नही है क्योकि मोहरहित जिनेन्द्रके पक्षपातमे अशुभ कर्मोका बन्ध नही होता। एकजिन और सभी जिनोकी वन्दनाका समान फल है। अत. समस्त जिनोको वन्दनाका करना फल सहित नही है इसलिये एकको वन्दना करनी चाहिये। दूसरी बात यह भी है कि छद्मस्थका उपयोग एक साथ सबकी स्तुतिमे लग भी नही सकता। अत. एककी ही वन्दना करनी चाहिये, ऐसा एकान्त आग्रह नही करना चाहिये क्योकि एकान्तका आग्रह दुर्णय—मिथ्यानय है। इसलिये उपर्युक्त बाधाओके निराकरणपूर्वक एक जिनकी वन्दना निरवद्य है यह बतलानेके लिये वन्दनाका प्रकार और उसके फलका प्ररूपण किया जाता है।

एक तीर्थङ्करके स्तवनरूप वन्दनामे महावीर तीर्थङ्करका स्तवन इस प्रकार है—

अगाधेभवाब्धौ पतन्त जनं यः
समुद्दिश्य तत्त्वं सुखाढ्यं चकार।
दयाब्धिः सुखाब्धिः सदासौख्यरूपः
स वीरः प्रवीरः प्रमोदं प्रदद्यात्॥ १५॥

अर्थ—जिन्होंने अगाध-गहरे संसार सागरमें पडते हुए जीवोको तत्त्वका उपदेश देकर सुखी किया था, जो दयाके सागर थे, सुखके समुद्र थे तथा सदा सुख स्वरूप थे वे अतिशय शूरवीर महावीर भगवान् श्रेष्ठ आनन्दको प्रदान करें॥ १५॥

विदग्धोऽपिलोका कृतो येन मुग्धः
स कामः प्रकामं रतं चात्मतत्त्वे ।
न शक्तो बभूव प्रजेतुं मनाग् यं
स वीर प्रवीर प्रमोदं प्रदद्यात् ॥ १६ ॥

अर्थ—जिसके द्वारा चतुर मनुष्य भी मुग्ध-मूढ कर दिये गये थे वह काम आत्मतत्त्वमे लीन रहने वाले जिन्हे जीतनेके लिये कुछ भी समर्थ नही हो सका था वे अतिशय शूरवीर महावीर भगवान् श्रेष्ठ आनन्दको प्रदान करे ॥ १६ ॥

जगज्जीवघातीनि घातीनि कृत्वा
हतान्येव लेभे परं ज्ञानतत्त्वम् ।
अलोकं च लोकं ददर्शात्मना यः
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥ १७ ॥

अर्थ—जगत्के जीवोका घात करने वाले घातियाकर्मोंको नष्ट करके ही जिन्होने उत्कृष्ट ज्ञानतत्त्व-केवलज्ञानको प्राप्त किया था और अपने आपके द्वारा जिन्होने लोक अलोकको देखा था वे अतिशय शूरवीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करे ॥ १७ ॥

सशिष्यः स विप्रो गुरुर्गौतमोऽयं
समासीनमाराद् विलोक्यैवनूनम् ।
मदं भूरिमानं मुमोच स्वकीयं
स वीरः प्रवीरः प्रमोद प्रदद्यात् ॥ १८ ॥

अर्थ—शिष्यो सहित गुरु गौतम ब्राह्मणने समवसरणमे विराजमान जिन्हे दूरसे ही देखकर निश्चित है अपना बहुत भारी अहकार छोड दिया था वे अत्यन्त शूरवीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करें ॥ १८ ॥

सुरेन्द्रानुगेनालकानामकेनाऽऽ
कृतास्थानभूमि समास्थाय दिव्यैः ।
वचोभिर्यं ईशो दिदेशार्थसार्थं
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥ १९ ॥

अर्थ—इन्द्रके अनुगामी-आज्ञाकारी कुबेरके द्वारा निर्मित समवसरणमे विराजमान होकर जिन्होने दिव्यध्वनिके द्वारा पदार्थ समूहका उपदेश दिया था वे अतिशय शूरवीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करे ॥ १९ ॥

विहृत्यार्यखण्डे सुधर्मामृतस्य
प्रवृष्ट्या समन्ताज्जगज्जीवसस्यान् ।
प्रवृद्धान् चकाराम्बुदोऽपि यः
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ।। २० ।।

अर्थ—जिन्होने आर्यखण्डमे विहारकर सद्धर्मरूप अमृतकी वर्षासे सर्वत्र जगत्के प्राणीरूप धान्योको बढाया था, इस तरह जो मेघस्वरूप थे वे अतिशय शूर-वीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करें ।। २० ।।

अनेकान्तदण्डैः प्रचण्डैरखण्डैः
समुद्दण्डवादिप्रवेतण्डगण्डान् ।
विभेदाशु यस्य प्रकृष्टः प्रभावः
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ।। २१ ।।

अर्थ—जिनके प्रकृष्ट प्रभावने शक्तिशाली एव अखण्डित अनेकान्तरूपी दण्डोके द्वारा बडे-बडे वादीरूपी हस्तियोके गण्डस्थलोको शीघ्र ही विदीर्ण किया था वे अतिशय शूर-वीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करें ।। २१ ।।

ततो ध्यानरूपं निशातं विसातं
कृपाणं स्वपाणौ य आदाय सद्य ।
अघातीनि हत्वा बभूव प्रमुक्त
स वीर प्रवीर. प्रमोदं प्रदद्यात् ।। २२ ।।

अर्थ—तदनन्तर ध्यानरूपी तीक्ष्ण अत्यन्त शुक्ल कृपाणको हाथमे लेकर अघातिया कर्मोंका नाशकर जो मुक्त हुए थे वे अत्यन्त शूर-वीर महावीर भगवान् श्रेष्ठ आनन्द प्रदान करें ।। २२ ।।

अथानन्दमानन्दमाद्यन्तहीनं
निजात्मप्रजातं ह्यनक्षं सदक्षम् ।
चिरं यश्च भेजे निजे नैजरूपं
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ।। २३ ।।

अर्थ—मुक्त होनेके बाद जो अनादि, अनन्त, निजात्मासे उत्पन्न, अतीन्द्रिय, आत्मरूप एवं प्रत्यक्ष बहुत भारी आनन्दको प्राप्त हुए थे वे अत्यन्त शूरवीर महावीर भगवान् श्रेष्ठ आनन्दको प्रदान करें ।। २३ ।।

वन्दना आवश्यकमें एक जिनके सिवाय अन्य गुरुजनोको वन्दनाकी जाती है, यह कहते हैं—

सूरीणां वा गुरूणां वा प्रतिमानां च भक्तित ।
वन्दना मुनिभि कार्या यथाविधियथागमम् ।। २४ ।।
पञ्चषट्सप्तहस्तैश्च दूरस्थार्यिका क्रमात् ।
सूरिं बहुश्रुतं साधूनन्यान् वन्देत भक्तित ।। २५ ।।

अर्थ—आचार्यों, गुरुओं तथा प्रतिमाओको भी वन्दना मुनियोको आगमके अनुसार यथाविधि भक्तिपूर्वक करना चाहिये। आर्यिका पाच हाथ दूर बैठकर आचार्यकी, छह हाथ दूर बैठकर उपाध्यायकी और सात हाथ दूर बैठकर अन्य साधुओको भक्तिपूर्वक वन्दना करे ।। २४-२५ ।।

आगे गुरु वन्दनाके अवसर और विधिका वर्णन करते हैं—

व्याक्षिप्तं वा परावृत्तं निद्रादिनिरतं तथा ।
आहारं वाथ नीहार कुर्बन्तं संयतं जनम् ।। २६ ।।
न वन्देत मुनि क्वापि वन्दनायां समुद्यतः ।
प्रतीक्ष्य समयस्तेन वन्दनायां समर्थित ।। २७ ।।
आसनस्थोगुरुर्वन्द्य सम्मुखस्थश्च शान्तहृद् ।
तस्यानुज्ञां समादाय वन्दनां विदधीत सः ।। २८ ।।
आलोचना विधानेषु प्रश्नानां चापि प्रच्छने ।
स्वेनापराधे सञ्जाते पूजास्वाध्याययोस्तथा ।। २९ ।।
वन्दना मुनिभि कार्या कृतिकर्मपुरस्सरम् ।
प्रतिक्रमे च चत्वारि स्वाध्याये त्रीणि साधुना ।। ३० ।।
कृतिकर्माणि कार्याणि पूर्वाह्णे चापराह्णके ।
यथाविध्येवकार्याणि प्रभवन्ति फलाय हि ।। ३१ ।।

अर्थ—जिस समय संयत जन व्याक्षिप्त—अन्यमनस्क हो विपरीत मुख कर बैठे हो, निद्रामे निरत हो, आहार या नीहार कर रहे हो, उस समय वन्दनामे तत्पर साधु कही भी उनकी वन्दना न करे किन्तु वन्दनाके योग्य अवसरको प्रतीक्षा करे। जब गुरु आसनपर बैठे हो, सम्मुख हो और शान्त हृदय हो तब उनकी आज्ञा लेकर वन्दना करनी चाहिये। अपने द्वारा अपराध हो जानेपर अथवा पूजा और स्वाध्याय के समय मुनियोको कृतिकर्मके साथ वन्दना करनी चाहिये। प्रति-

क्रमणमें चार और स्वाध्यायमे तीन कृतिकर्म करना चाहिये। ये कृतिकर्म पूर्वाह्न और अपराह्न—दोनो समय होते हैं तथा दोनोंके मिल कर चौदह होते हैं। विधिपूर्वक ही किये गये कार्य फल देनेमे समर्थ होते हैं। कृतिकर्मका विशेष स्पष्टीकरण प्रतिक्रमण आवश्यकके वर्णनमे किया जायगा॥ २६-३१॥

आगे स्तुति आवश्यकका कथन करते हैं—

चतुर्विशति तीर्थेशां धर्मचक्रप्रवर्तिनाम्।
स्तुतिर्या विविधैर्वृत्तैस्तत्स्तुत्यावश्यकं मतम्॥ ३२॥

अर्थ—धर्मचक्रके प्रवर्तक चौबीस तीर्थङ्करोकी नाना छन्दो द्वारा स्तुतिकी जाती है, वह स्तुति नामक आवश्यक है॥ ३२॥

विशेष—इस सन्दर्भमे कषायपाहुड प्रथम भाग (पृ० ९१-९२-९३) का शंका समाधान विशिष्ट रुचिकर है—

'चउवीस वि तित्थयरा सावज्जा, छज्जीवविराहणहेउसावयधम्मोवएस कारित्तादो। त जहा—दाणं पूजा सीलमुववासो चेदि चउव्विहो सावयधम्मो। एसो चउव्विहो वि छज्जीव विराहओ, पयण पायणग्गि सधुक्षण—जालण-सूदि-सूदाणादि वावारेहि जोवविराहणाए विणा दाणाणुववत्तीदो। तरुवरछिदण-छिदावणिट्ठपादण-पादावण-तद्दहण दहावणादि वावारेण छज्जीव विराहण हेउणा विणा जिणभवणकरणकरावणण्णहाणुववत्तीदो। ण्हवणोवलेवण-समज्जण-छुहावण-फुल्लारोवण-धूवदहणादि वावारेहि जीववहाविणाभावीहि विणा पूजकरणाणुववत्तोदो च। कथ सीलरक्खणं सावज्ज? ण, सदारपोडाए विणा सोलपरिपालणाणुववत्तोदो। कथ उववासो सावज्जो? ण, सपोट्टत्थ पाणिपीडाए विणा उववासाणुववत्तीदो। थावरजोवे मोत्तूण तसजोवे चेव मा मारेहु त्ति सावियाण मुवदेसदाणदो वा ण जिणा णिरवज्जा। अणसणोमोदरिय-वुत्तिपरिसंखाण-रसपरिच्चाय-विवित्त-सयणासण-रुक्ख मूलादावणब्भोवासुक्कुडासण-पलियंकद्धपलियंक-ठाण-गोणवोरासण-विणय-वेज्जावच्च-सज्झाय-झाणादिकिलेसेसु जोवे पयिसारिय खलियारणादो वा ण जिणा णिरवज्जा तम्हा ते ण वदणिज्जा त्ति?

एत्थ परिहारो उच्चदे—तं जहा-जइ वि एवमुवदिसंति तित्थयरा तो वि ण तेसिं कम्मबंधो अत्थि, तत्थ मिच्छत्ता संजमकसायपच्चयाभावेण वेयणोयवज्जा सेस कम्माणं बंधाभावादो। वेयणोयस्स विणट्ठिदि अणुभागबधा अत्थि, तत्थ कसाय पच्चया भावादो। जोगो अत्थि त्ति

ण तत्थ पयडिपदेस बंधाणमत्थित्तं वोत्तुं सक्किज्जदे ? ट्ठिदिबंधेण विणा उदयसरूवेण आगच्छमाणाणं पदेसाणमुवयारेण बधववएसुवदेसादो। ण च जिणेसु देस-सयलघम्मोव देसेण अज्जिय कम्मसंचओ वि अत्थि, उदयसरूव कम्मागमादो असंखेज्जगुणाए सेढीए पुव्वसंचिय कम्म णिज्जरं पडिसमय करेंतेसु कम्मसंचयाणुववत्तीदो। ण च तित्थयरमण वयण-कायवत्तीओ इच्छा पुव्वियाओ जेण तेसिं बंधो होज्ज, किंतु दिण-यर-कप्परुक्खा णं पउत्तिओ व्व वयि ससियाओ।

शङ्का—चौबीसो तीर्थङ्कर सावद्य-सदोष हैं क्योकि वे षट्कायिक जीवोको विराधनामे कारणभूत श्रावक धर्मका उपदेश करते हैं। जैसे - दान, पूजा, शील और उपवास—यह चार प्रकारका श्रावकधर्म है। यह चारो प्रकारका श्रावक धर्म षट्कायिक जीवोका विराधक है। भोजन का स्वयं पकाना, दूसरोसे पकवाना, अग्निका धोकना, जलाना, खूंतना तथा खूंतवाना आदि कार्योंसे जीवविराधनाके बिना दान नही बनता। इसी प्रकार वृक्षोका काटना, कटवाना, ईंटोका गिराना, गिरवाना तथा उनको पकाना पकवाना आदि षट्कायिक जीवोके विराधनाके कारणभूत व्यापारके बिना जिन भवनका स्वयं बनाना तथा दूसरोसे बनवाना नही हो सकता। अभिषेक, उपलेपन, सम्मार्जन, चन्दन लगाना, फूल चढाना तथा धूप जलाना आदि जीववधके अविनाभावी कार्योंके बिना पूजाका करना नही बनता। अच्छा, शीलरक्षा सदोष क्यो है ? ऐसी बात नही है क्योकि स्वस्त्रीको पीडा पहुंचाये बिना शीलकी रक्षा नही हो सकती। उपवासका करना सदोष क्यो है ? अपने पेटमे स्थित जीवोको पीड़ा पहुँचाए बिना उपवास नही हो सकता। अथवा स्थावर जीवोको छोड़-कर त्रस जीवोको मत मारो ऐसा श्राविकाओके लिये उपदेश देनेसे तीर्थ-ङ्कर सावद्य-सदोष है। अथवा अनशन, ऊनोदर, वृत्तिपरिसख्यान, रस-परित्याग, विविक्तशय्यासन, वृक्षमूल, आतापन, अभ्रावकाशयोग, उत्कुटासन, पर्यङ्कासन, अर्धपर्यङ्कासन, खड्गासन, गवासन, वीरासन, विनय, वैयावृत्य, स्वाध्याय तथा ध्यान आदिसे होनेवाले क्लेशोमे जीवो-को डालकर उन्हे ठगनेसे जिन निरवद्य नही हैं अत. वन्दनीय—स्तुति करने योग्य नही हैं।

समाधान—यहां पूर्वोक्त शङ्काका परिहार करते हैं—यद्यपि तीर्थं-कर ऐसा उपदेश देते हैं तो भी उनके कर्मबन्ध नही होता। क्योकि वहाँ मिथ्यात्व, असंयम और कषायरूप प्रत्यय कारणका अभाव होनेसे वेद-

नीयको छोड समस्त कर्मोंके बन्धका अभाव है। वेदनीयके भी स्थिति और अनुभागबन्ध नही हैं क्योकि कषायरूप प्रत्ययका अभाव है। योग है, इसलिये प्रकृति प्रदेश बन्धका अस्तित्व है यह नही कहा जा सकता, क्योकि स्थितिबन्धके बिना उदयरूपसे आनेवाले प्रदेशोमे उपचारसे ही बन्धका उपदेश है। यह भी कहना ठीक नही है कि उनके देश चारित्र और सकल चारित्रका उपदेश देनेसे अर्जित कर्मोंका संचय है, क्योंकि प्रत्येक समय उदयरूपसे जितने कर्म आते हैं उनसे असंख्यातगुणी कर्म निर्जरा प्रत्येक समय वे करते हैं। इसके सिवाय तीर्थंकरोके मन-वचन-कायकी प्रवृत्तियां भी इच्छापूर्वक नही होती किन्तु सूर्य और कल्पवृक्षकी प्रवृत्तियोके समान वैस्रसिक-स्वाभाविक है।

आगे विविध छन्दोमे वृषभादि तीर्थंकरोकी स्तुति करते हैं—

येन क्षितावसिमषीप्रभृतीः सुवृत्तीः
संदिश्य कापि विहितोपकृतिर्जनानाम्।
कल्पाङ्घ्रिनाशमरणोन्मुखजीविताना-
मादीश्वरोऽवतु सतां सुखदां श्रियं सः॥ ३३॥

अर्थ—जिन्होने पृथिवीपर कल्पवृक्षोके नष्ट होनेसे मरणोन्मुख जीवो-के लिये असि, मषी आदि वृत्तियोका उपदेश देकर उनका बहुत भारी उपकार किया था, वे आदीश्वर—भगवान् वृषभदेव सत्पुरुषोकी सुख-दायक लक्ष्मीकी रक्षा करे॥ ३३॥

यो नो जितः कर्मकलापकेन जितत्रिलोकीगतजन्तुकेन।
जेतारमीशं रिपुजालकस्याजितं मुदा तं प्रणमामि नित्यम्॥ ३४॥

अर्थ—तीन लोकके समस्त जीवोको जीतनेवाले कर्मसमूहके द्वारा जो नही जीते जा सके उन शत्रुसमूहके विजेता अजितनाथ भगवान्को मै हर्षपूर्वक नित्य ही प्रणाम करता हू॥ ३४॥

संसारतापविनिपातपयोदरूपं
जन्माब्धिमग्नजनसंतरणं सुरूपम्।
मिथ्यान्धमोहहननाय सहस्ररश्मि
तं शंभवं ह्यमितसंविभवं नमामि॥ ३५॥

अर्थ—जो संसार—पञ्च-परावर्तनरूप संतापको नष्ट करनेके लिये मेघरूप है, संसारमे निमग्न जीवोको तारने वाले हैं, सुरूप—अतिशय सुन्दर हैं मिथ्यात्वरूपी गाढ अन्धकारका नाश करनेके लिये सूर्य हैं

तथा अपरिमित समीचीन वैभवके स्वामी हैं उन शंभवनाथ भगवान्को मैं नमस्कार करता हू ॥ ३५ ॥

कर्मारिदु:खीकृतमानसान्योऽभिनन्दयामास शिवप्रदानात् ।
भक्त्याभृतोऽहं जगदेकबन्धुं नमामि नित्य ह्यभिनन्दनं तम् ॥ ३६ ॥

अर्थ—जिन्होने मुक्ति प्रदानकर कर्मरूप शत्रुओसे दु खित जीवोको अभिनन्दित किया था तथा जो जगत्के एक अद्वितीय बन्धु थे उन अभिनन्दन भगवान्को मैं भक्तिपूर्ण हो नित्य ही नमस्कार करता हू ॥ ३६ ॥

भोगा भुजङ्गा न विवेकवद्भिर्निषेवणीया विषमा यतस्ते ।
एतत् समादेशि हि येन तत्त्वं जिनं सदा त सुमति समीडे ॥ ३७ ॥

अर्थ—विवेकी मनुष्यो द्वारा भोगरूपो भुजङ्ग—नाग सेवनोय नही है क्योकि वे विषम है, यह तत्त्व-सारगर्भित बात जिन्होने कही थी उन सुमति जिनेन्द्रको मैं सदा स्तुति करता हूँ ॥ ३७ ॥

देहप्रभान्यक्कृतपद्मपत्रं पद्मेशवन्द्य कमलालयाढ्यम् ।
तं भव्यपद्माकरपद्मबन्धु पद्मप्रभं सम्प्रणमामि नित्यम् ॥ ३८ ॥

अर्थ—जिन्होने शरीरकी प्रभासे लाल कमलदलको तिरस्कृत कर दिया था, जो लक्ष्मीपति नारायणके द्वारा वन्दनोय थे, स्वय लक्ष्मोसे सहित थे तथा भव्यजीवरूप कमलवनको विकसित करनेके लिये जो सूर्य थे उन पद्मप्रभ भगवान्को मैं नित्य ही प्रणाम करता हूँ ॥ ३८ ॥

कृपाण स्वपाणौ समाधिस्वरूप गृहीत्वा समूलं हता येन वल्ली ।
जराजन्ममृत्युस्वरूपा विरूपा सुपार्श्वं तमीश भजे भक्तिभावात् ॥ ३९ ॥

अर्थ—जिन्होने शुक्लध्यानरूपी कृपाणको अपने हाथमे लेकर जन्म जरामृत्युरूपी कुरूप लताको जड सहित काट डाला था उन सुपार्श्वनाथ भगवान्की मै भक्तिपूर्वक आराधना करता हू ॥ ३९ ॥

यस्यास्यकान्त्या जितचन्द्रमा स दिने दिने क्षीणतरोभवन् वै ।
मन्ये ममज्जाब्धिजले सलज्जश्चन्द्रप्रभ तं प्रणमामि नित्यम् ॥ ४० ॥

अर्थ—जिनके मुखकी कान्तिसे पराजित हुआ वह चन्द्रमा प्रतिदिन क्षीण होता हुआ मानो लज्जित होकर ही समुद्रमे मग्न हो गया था, उन चन्द्रप्रभ भगवान्को मैं नित्य ही प्रणाम करता हूँ ॥ ४० ॥

अयि कथ सुविधे वरबोधभाक्
विरलवाक् स्तवनं विदधामि ते ।

सुगुणरत्नगिरेऽमितवाक्पते
भवतु मां धिगिमां च सुरश्रियम् ॥ ४१ ॥
इति मदं विजहौ सुरशासनो गुरुयुतोऽपि यदीयगुणस्तुतौ ।
निरवधिं शुभधिं गुणशेवधिं हतविधिं सुविधिं विनमामि तम् ॥ ४२ ॥
(युग्मम्)

अर्थ—हे सुगुणरूप रत्नोके गिरि ! हे अपरिमित वचनोके स्वामी ! हे सुविधिनाथ भगवान् ! अल्पज्ञानी तथा अल्पशब्दोसे सहित मैं आपकी स्तुति कैसे कर सकता हूँ ? इस प्रकार बृहस्पतिसे सहित होने पर भी इन्द्रने जिनकी स्तुतिमे मद—गर्व छोड़ दिया था उन असीम, कल्याणके धारक, गुणोके निधि तथा कर्मोंको नष्ट करनेवाले सुविधिनाथ भगवान्को मैं नमस्कार करता हूँ ॥ ४१-४२ ॥

इष्टानिष्टवियोगप्रयोगसन्तापतप्तजनतानाम् ।
मेघायितं हि येन प्रवन्दनीयः स शीतलः सततम् ॥ ४३ ॥

अर्थ – इष्टवियोग और अनिष्ट सयोगरूप संतापसे सतप्त जनसमूहके लिये जिन्होने मेघके समान आचरण किया था, वे शीतलनाथ भगवान् सदा वन्दनीय हैं ॥ ४३ ॥

येन स्वयं बोधमयेन लोके प्रकाशितः श्रेष्ठशिवस्य पन्थाः ।
श्रेयः पदप्रापणहेतुभूतं जिनं तमेकादशमानमामि ॥ ४४ ॥

अर्थ—स्वय ज्ञानमय रहनेवाले जिन्होने जगत्मे मोक्षका मार्ग प्रकाशित किया था तथा जो कल्याणकारी पद—मोक्षकी प्राप्तिमे कारणभूत है उन ग्यारहवे भगवान् श्रेयोनाथको मैं नमस्कार करता हूँ ॥ ४४ ॥

जयति जनसुवन्द्यश्चिच्चमत्कारनन्द्यः
शमसुखभरकन्दोऽपास्तकर्मारिवृन्दः ।
निखिलगुणगरिष्ठः कीर्तिसत्तावरिष्ठः
सकलसुरपपूज्यो वासुपूज्यो जिनेन्द्रः ॥ ४५ ॥

अर्थ—जो मनुष्योके द्वारा वन्दनीय है, चैतन्य चमत्कारसे नन्दनीय हैं, शान्ति सुख-समूहके कन्द है, कर्मरूप शत्रुओके समूहको नष्ट करनेवाले हैं, समस्त गुणोसे श्रेष्ठ हैं, कीर्तिके सद्भावसे महान् हैं और समस्त इन्द्रोसे पूज्य है वे वासुपूज्य जिनेन्द्र जयवन्त प्रवर्तते हैं ॥ ४५ ॥

वरबोधविरागशरेण हि यः सकलं शकलीकृतवानहितम् ।
निजकर्मबलं तमहो सतत ह्यमल विमल विनमामि मुनिम् ॥ ४६ ॥

अर्थ—जिन्होने अपने कर्ममलरूपी समस्त शत्रुको उत्कृष्ट ज्ञान और वैराग्यरूपी बाणके द्वारा खण्ड-खण्ड कर दिया था उन निर्मल-विमलनाथ मुनीन्द्रको मैं नमस्कार करता हूँ ॥ ४६ ॥

प्राप्तो न पारो विबुधां समूहैर्यदीयसज्ज्ञानसरस्वतो वै ।
नौम्यर्चनीयं जगतीपतिं तमनाद्यनन्तं जिनपं ह्यनन्तम् ॥ ४७ ॥

अर्थ—विद्वानोके समूहोने जिनके सम्यग्ज्ञानरूपी सागरका पार प्राप्त नही कर पाया उन पूजनीय, जगत्के स्वामी तथा (द्रव्यार्थिक नयसे) अनाद्यनन्त अनन्तनाथ जिनेन्द्रको मै स्तुति करता हूँ ॥ ४७ ॥

संसारसिन्धोर्विनिमग्नजन्तूनुद्धृत्य यो मुक्तिपदे बभार ।
त धर्मसंज्ञैः सहितं क्षमाद्यैर्नौम्यात्मनीनं मुनिधर्मनाथम् ॥ ४८ ॥

अर्थ—जिन्होने संसार-सागरसे डूबे हुए जीवोको निकालकर मोक्ष-स्थानमे पहुँचाया था तथा जो क्षमा आदि धर्मोंसे सहित थे उन आत्म-हितकारी धर्मनाथ जिनेन्द्रकी मै स्तुति करता हूँ ॥ ४८ ॥

यस्य पुरस्ताद्रिपुवरनाथा नो स्थिरता समरे समवापुः ।
चक्रकरं सुखशान्तिकरं तं शान्तिजिनं सततं प्रणतोऽस्मि ॥ ४९ ॥

अर्थ—जिनके आगे युद्धमे बडे-बड़े शत्रु राजा स्थिरताको प्राप्त नही हो सके थे, जिनके हाथमे चक्ररत्न था तथा जो सुख और शान्तिके करनेवाले थे उन शान्ति जिनेन्द्रके प्रति मै नित्य ही प्रणत—नम्रीभूत हूँ ॥ ४९ ॥

ररक्ष कुन्थुप्रमुखान् सुजीवान् दयाप्रतानेन दयालयो यः ।
स कुन्थुनाथो दयया सनाथः करोतु मां शीघ्रमहो ! सनाथम् ॥ ५० ॥

अर्थ—दयाके आधारस्वरूप जिन्होने दयाके प्रसारसे कुन्थु आदि जीवोकी रक्षाकी थी तथा जो दयासे सनाथ—सहित थे वे कुन्थुनाथ भगवान् मुझे सनाथ—अपने स्वामित्वसे सहित करे ॥ ५० ॥

प्रहतं रिपुचक्रमरं सुदृढं वरयोगधरेण हि येन ततम् ।
तमरं भगवन्तमहं सततं विरतं जगतः प्रणमामि हितम् ॥ ५१ ॥

अर्थ—उत्कृष्टयोग—ध्यानको धारण करनेवाले जिन्होने सुदृढ—शक्तिशाली शत्रु समूहको शीघ्र ही नष्ट कर दिया था उन जगत्से विरक्त हितकारी अर जिनेन्द्रको मैं नित्य ही प्रणाम करता हूँ ॥ ५१ ॥

मोहमल्लमदभेदनधीरं कीर्तिगानमुखरीकृतवीरम् ।
धैर्यखड्गविनिपातितमारं तं नमामि वर मल्लिजिनेन्द्रम् ॥ ५२ ॥

अर्थ—जो मोहरूपी मल्लका गर्व खण्डित करनेमे धीर थे, जिन्होने अपने कीर्तिगानसे वीरोको मुखर किया था अर्थात् बडे-बडे वीर जिनका कीर्तिगान किया करते थे और जिन्होने धैर्यरूपी खड्गके द्वारा कामको मार गिराया था उन मल्लि जिनेन्द्रको मैं नमस्कार करता हूँ ॥ ५२ ॥

मन्ता यो वै वेदतत्त्वार्थबोधाद्धिंसादीनां ध्वंसतः सुव्रतश्च ।
तं तीर्थेशं भग्नकर्मारिशीर्षं भक्त्या नम्रः सुव्रतं सनमामि ॥ ५३ ॥

अर्थ—जो आगम प्रतिपादित तत्त्वार्थके जानकार होनेसे मन्ता—मुनि हैं तथा हिंसादि पापोका नाश करनेसे सुव्रत हैं एव जिन्होने कर्म-रूपी शत्रुओके शिरको भग्न कर दिया है उन मुनि सुव्रत तीर्थंङ्करको मैं भक्तिसे नम्र हो नमस्कार करता हूँ ॥ ५३ ॥

सकलबोधधरं गुणिनां वरं हितकर जगतां शमताकरम् ।
स्थिरतया जितमेरुमहीधरं नमिजिनं जिनमामि निरन्तरम् ॥ ५४ ॥

अर्थ—जो पूर्ण ज्ञानके धारक थे, गुणी जनोमे श्रेष्ठ थे, जगत्का हित करनेवाले थे, शान्तिके आकर थे और जिन्होने स्थिरताके द्वारा मेरु पर्वतको जीत लिया था उन नमिनाथ जिनेन्द्रको मै निरन्तर नमस्कार करता हूँ ॥ ५४ ॥

विज्ञानलोकत्रितयं समन्तादनन्तबोधेन बुधाधिनाथम् ।
तं माननीय मुनिनाथनेमिं नमाम्यहं धर्मरथस्य नेमिम् ॥ ५५ ॥

अर्थ—जिन्होने अनन्तज्ञान—केवलज्ञानके द्वारा तीनो लोकोको सब ओरसे जान लिया था, जो ज्ञानीजनोके स्वामी थे तथा धर्मरूपी रथके नेमि—प्रवर्तक थे उन माननीय नेमिनाथ भगवान्‌को मै नमस्कार करता हूँ ॥ ५५ ॥

येनातिमानः कमठस्य मानो ध्वस्तोऽसमस्थैर्यगुणाणुनैव ।
देहप्रभादीपित पार्श्वदेश तं पार्श्वनाथं सततं नमामः ॥ ५६ ॥

अर्थ—जिन्होने अपने धैर्य गुणके अंशमात्रसे कमठके बहुत भारी मानको नष्टकर दिया था, शरीरकी प्रभासे निकटवर्ती प्रदेशको देदीप्य-मान करनेवाले उन पार्श्वनाथ भगवान्‌को हम नमस्कार करते हैं ॥ ५६ ॥

यं जन्मकल्याणमहोत्सवेषु सुराः समागत्य सुरेशलोकात् ।
क्षीराब्धिनीरैरधिमेरुशृङ्गं समभ्यसिञ्चन् वरभक्तिभावात् ॥ ५७ ॥

त वर्धमान भुवि वर्धमानं श्रेयःश्रिया ध्वस्तसमस्तमानम् ।
भक्त्याभृतः सम्मुदितश्च नित्यं नमाम्यहं तीर्थङ्कर समर्च्यम् ।। ५८ ।।
(युग्मम्)

अर्थ—धर्मसे सहित ध्यान धर्म्यध्यान कहलाता है। आगममें इसके भी चार भेद कहे गये हैं—पहला आज्ञा-विचय, दूसरा अपाय-विचय, तीसरा विपाक-विचय और चौथा संस्थान-विचय। सूक्ष्म, अन्तरित तथा दूरवर्ती पदार्थोंका आज्ञा मात्रसे चिन्तन करना आज्ञाविचय है। चतुर्गतिके दुःख तथा उससे बचनेके उपायका चिन्तन करना अपाय-विचय है। कर्म प्रकृतियोंके फल, उदय, उदीरणा तथा संक्रमण आदिका विचार करना विपाक-विचय है और लोकके संस्थान-आकार आदिका विचार करना संस्थान-विचय कहलाता है ॥ १०९-११० ॥

आगे शुक्लध्यानका कथन करते हैं—

> शुक्लस्य रागकालिम्ना रहितस्य भवेत्तु यत्।
> शुक्लध्यानं परं प्रोक्तं प्रधानं मोक्षकारणम् ॥ १११ ॥
> एतस्यापि चतुर्भेदाः शास्त्रमध्ये प्रकल्पिताः।
> कर्मनिर्जरणोपाया मुनीनामेव सन्ति ते ॥ ११२ ॥

पृथग् वितर्कवीचार एकत्वाद्यवितर्क कः।
सूक्ष्मक्रियोद्भवं नाम तुर्यं व्युपरतक्रियम् ॥ ११३ ॥

अर्थ—रागकी कालिमासे रहित शुक्ल-वीतराग परिणाम वाले मनुष्यके जो ध्यान होता है वह शुक्लध्यान कहा गया है। यह शुक्लध्यान मोक्षका प्रधान कारण है। शुक्लध्यानके भी चार भेद शास्त्रोंमे कहे गये हैं। ये सभी ध्यान कर्म निर्जराके उपाय हैं तथा मुनियोंके ही होते हैं। पहला शुक्लध्यान पृथक्त्व वितर्कवीचार, दूसरा एकत्व वितर्क, तीसरा सूक्ष्म क्रियापत्ति और चौथा व्युपरतक्रिया निर्वति है[1] ॥ १११-११३ ॥

भावार्थ—जिसमे द्रव्य, पर्याय, शब्द, अर्थ और योगमे परिवर्तन हो वह पृथक्त्व वितर्कवीचार नामका पहला शुक्लध्यान है। यह तीनो योगोके आलम्बनसे होता है। जिसमे द्रव्य, पर्याय आदिका परिवर्तन नही होता है वह एकत्व वितर्क नामका दूसरा शुक्लध्यान है। यह तीनमेसे किसी एक योगके आलम्बनसे होता है। तेरहवें गुणस्थानके अन्तिम अन्तर्मुहूर्तमे जब मात्र काययोगका सूक्ष्म स्पन्दन रह जाता है तब सूक्ष्मक्रिया प्रतिपाति नामका तीसरा शुक्लध्यान होता है और जब सूक्ष्म काययोगका भी स्पन्दन बद हो जाता है पूर्वरूपसे योग रहित अवस्था हो जाती है तब चौदहवे गुणस्थानमे व्युपरत-क्रिया-निर्वति नामका चौथा शुक्लध्यान होता है। प्रथम शुक्लध्यानसे मोहनीय कर्मका उपशम अथवा क्षय होता है। द्वितीय शुक्लध्यानसे शेष तीन घातिया कर्मोंका क्षय होता है। तृतीय शुक्ल ध्यानसे कर्मोंकी अत्यधिक निर्जरा होती है और चतुर्थ शुक्लध्यानके द्वारा अघातिया कर्मोंकी पचासी प्रकृतियोंका क्षय होता है।

आगे तप आचारका समारोप करते है—

एषोऽस्ति तप आचारः साधूनां प्रमुखा क्रिया।
एतेनैव विलीयन्ते कर्माणि निखिलान्यपि ॥ ११४ ॥
अत्रैव तप आचारे मुनयः कर्मनिर्जराम्।
चिकीर्षव स्तपस्यन्ति धृत्वा नानाव्रतान्यपि ॥ ११५ ॥
सिंहनिष्क्रीडितादीनि कठिनानि महान्त्यपि।
एषां विधिविधानानि ज्ञेयानि हरिवंशत. ॥ ११६ ॥

---

१. इनका स्वरूप तथा गुणस्थान आदिका वर्णन पहले सम्यक्त्व-चिन्तामणि और सज्ज्ञान चन्द्रिकामे किया गया है, अत विस्तार भयसे यहाँ भेदमात्र कहे गये हैं।

अर्थ—यह तप आचार साधुओंकी प्रमुख क्रिया है। इसीके द्वारा सभी कर्म विलय—विनाशको प्राप्त होते हैं। इसी तप आचारमे कर्म-निर्जराके इच्छुक मुनि सिंहनिष्क्रीडित आदि बड़े-बड़े कठिन व्रत धारण कर तपस्या करते हैं। इन व्रतोंका विधि-विधान हरिवंश पुराण (३४ वां सर्गसे) जानना चाहिये ॥ ११४-११६ ॥

आगे वीर्याचारका वर्णन करते हैं—

वीर्याचारमथाश्रित्य ब्रवीमि किञ्चिदत्र भोः।
यथाजातः स्वतो बालः स्वशक्तिं वर्धयन् क्रमात् ॥ ११७ ॥
उत्तुङ्गगिरिशृङ्गेषु चटितुं जायते क्षमः।
तथा सुदीक्षितः साधुः स्ववीर्यं वर्धयन् क्रमात् ॥ ११८ ॥
आतापनादियोगेषु दक्षो दक्षतरो भवेत्।
वीर्यं स्यादात्मनः शक्तिर्बलं शारीरिकं मतम् ॥ ११९ ॥
पुरस्तादात्मवीर्यस्य बलं तुच्छं हि दृश्यते।
कृतमासोपवासो य सोऽपि शैलशिलातले ॥ १२० ॥
करोत्यातापनं योगं चित्रं वीर्यं तपस्विनाम्।
अभ्रावकाशं शीततौ हिमाच्छादितकानने ॥ १२१ ॥
प्रावृट्कालेऽपि वर्षाभिः सागरीकृतभूतले।
वर्षायोग च संधृत्य पादपानामधस्तले ॥ १२२ ॥
ग्रीष्मर्तौ तप्तभूखण्डे शैले तप्तशिलोच्चये।
आतापनं महायोगं धृत्वा तिष्ठन्ति योगिनः ॥ १२३ ॥
वीर्याचारस्य मध्ये तु मुनयो ध्यानतत्पराः।
नानासनानि संधृत्य तिष्ठन्ति गहने वने ॥ १२४ ॥

अर्थ—अब वीर्याचारका आश्रयकर यहाँ कुछ कहता हूँ। जिस प्रकार उत्पन्न हुआ बालक स्वयं ही क्रम-क्रमसे अपनी शक्तिको बढाता हुआ उन्नत पर्वतकी चोटियोपर चढ़नेमे समर्थ होता है उसी प्रकार दीक्षित मुनि क्रमसे अपनी शक्तिको बढ़ाते हुए आतापनादि योगोमे अत्यन्त समर्थ हो जाते हैं। आत्माकी शक्तिको वीर्य और शारीरिक शक्तिको बल कहते हैं। आत्मशक्तिके सामने शारीरिक बल तुच्छ दिखाई देता है। मासोपवासी मुनि भी पर्वत शिलातलपर आतापन योग धारण करते हैं। सचमुच ही तपस्वियोका वीर्य आश्चर्यकारक होता है। जब वन बर्फसे आच्छादित रहता है ऐसी शीत ऋतुमे मुनि अभ्रावकाश—खुले मैदानमें तप करते हैं। वर्षासे जब स्थल समुद्रका रूप धारणकर

लेता है ऐसी वर्षा ऋतुमे वृक्षोके नीचे वर्षायोग धारणकर तप करते हैं और जब समस्त पृथिवीतल तप्त हो जाता है ऐसी ग्रीष्म ऋतुमे सतप्त पर्वतपर आतापन नामक महायोग धारणकर योगी स्थित होते है। ध्यानमे तत्पर रहने वाले मुनि, वीर्याचारके मध्य नाना आसन धारणकर सघन वनमे विद्यमान रहते है ॥ ११७-१२४ ॥

आगे पञ्चाचार प्रकरणका समारोप करते हैं—

पञ्चाचारमयं तपोऽत्र विधिना धृत्वा तपस्यन्ति ये
ते क्षिप्रं निविडं स्वकर्मनिगडं भित्वा शिव यान्ति वै ।
भो भव्यास्तपसां प्रभावमतुल दृष्ट्वा तपेयुश्चिरात्
भीत ते भवबन्धनाद्यदि मन कस्य प्रतीक्षा तव ॥ १२५ ॥

अर्थ—जो मुनि इस जगत्में विधिपूर्वक पञ्चाचार रूप तपको धारण कर तपस्या करते हैं वे निश्चयसे शीघ्र ही कर्मरूपी सुदृढ़ बेडीको काटकर मोक्षको प्राप्त होते है। ग्रन्थकार कहते हैं—हे भव्यजन हो ! यदि तुम्हारा मन संसारके बन्धनसे भयभीत हुआ है तो तपका अनुपम प्रभाव देखकर दीर्घकाल तक तप करो। तुम्हे किसकी प्रतीक्षा है ? ॥ १२५ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे पञ्चाचारका
वर्णन करनेवाला सप्तम प्रकाश पूर्ण हुआ।

अष्टम प्रकाश

अनुप्रेक्षाधिकार

मङ्गलाचरणम्

विपद्यमानं भुवनं विलोक्य
ये वीतरागा भवतो विभीताः ।
धरन्ति दीक्षां भुविमाननीयां
तांस्तानहं भक्तिभरेण नौमि ॥ १ ॥

अर्थ—संसारको नष्ट होता देख रागरहित जो पुरुष संसारसे भयभीत हो पृथिवीपर माननीय दीक्षाको धारण करते हैं उन प्रसिद्ध मुनियोको मै भक्तिभारसे नमस्कार करता हूँ ॥ १ ॥

अब वैराग्य वृद्धिके अर्थ अनुप्रेक्षाओंका वर्णन करते हुए प्रथम अनित्यानुप्रेक्षाका वर्णन करते हैं—

वैराग्यस्य प्रकर्षाय मुनिभिः काननस्थितैः ।
चिन्त्यन्ते भावना नूनमनित्यत्वादि संज्ञिताः ॥ २ ॥
नित्यं न विद्यते किञ्चिद् वस्तुलोकत्रये क्वचित् ।
भानुरुदेति यः प्रातः सायमस्तमुपैति सः ॥ ३ ॥
सुधांशुभिर्जगत्सर्वं सिञ्चन्निन्दुरपि स्वयम् ।
प्रातर्भवति निर्दीप्तिः शुष्कपाण्डुपलाशवत् ॥ ४ ॥
न दृश्यते बली रामो लक्ष्मणो न बलान्वितः ।
भरताद्या महाचक्रजिताखिलवसुन्धराः ॥ ५ ॥
न दृश्यन्ते महीभागे बलवद्भूपसेविताः ।
क्व लुप्ता सा च सौवर्णी लङ्का दशमुखस्य हि ॥ ६ ॥
शिरःस्थाः श्यामला बालाः क्रियन्ते जरसा सिताः ।
मुखचन्द्रस्य सौन्दर्यं नश्यत् क्वापि प्रलीयते ॥ ७ ॥
बाहू चैतौ च शुण्डाभौ जातौ शुष्कमृणालवत् ।
जितमुक्ता मुखे दन्ताः प्राप्तान्ताः क्व संगताः ॥ ८ ॥
यौवनं जन्तुजातस्य शरदभ्रवद् भङ्गुरम् ।
भङ्गुरा धनसम्पत्तिः चला सौन्दर्यसम्पदा ॥ ९ ॥
वस्तुतत्त्वं विमृश्यात्मन् स्वस्थो भव निरन्तरम् ।
देहाद भिन्नमवेहि त्वं ज्ञानानन्दस्वभावकम् ॥ १० ॥
सर्वं ह्यनित्यमेवैतत् पर्यायार्थविवक्षया ।
निखिलं नित्यमेवस्याद् द्रव्यार्थस्य विवक्षया ॥ ११ ॥

अर्थ—वैराग्यकी वृद्धिके लिये वनमे स्थित मुनिराज अनित्यत्व आदि भावनाओंका चिन्तवन करते हैं। तीनो लोकोमे कही कोई भी वस्तु नित्य नही है। जो सूर्य प्रातःकाल उदित होता है। वह सायं समय अस्तको प्राप्त हो जाता है। अमृतमय किरणोसे समस्त जगत्का सींचने वाला चन्द्रमा भी अपने आप प्रातःकाल सूखे पलाश पत्रके समान कान्तिरहित हो जाता है। न बलवान् राम दिखाई देते हैं और न बलिष्ठ लक्ष्मण। जिन्होने महाचक्रके द्वारा समस्त वसुधाको जीत लिया था तथा बड़े-बड़े बलवान् जिनकी सेवा करते थे ऐसे भरत आदि चक्रवर्ती दिखाई नहीं देते। रावणकी वह सोनेकी लंका कहा लुप्त हो गई। शिरके काले बाल वृद्धावस्थाके द्वारा शुक्ल कर दिये जाते हैं।

मुख चन्द्रका सौन्दर्य नष्ट होकर कहीं विलीन हो जाता है। हाथीके सूंडके समान आभा वाली भुजाएँ सूखी मृणालके समान हो जाती हैं। मोतियोको जीतने वाले मुखके दांत नष्ट होकर कहा चले जाते हैं? जीवोंका जीवन शरद्के बादलोके समान भङ्गुर है। धन सम्पत्ति नश्वर है, सौन्दर्य सम्पदा अस्थिर है। इस प्रकार हे आत्मन्! वस्तु स्वभावका विचारकर तूं निरन्तर स्वस्थ रह अपना उपयोग अन्य पदार्थोंमे मत घुमा। पर्यायार्थिकनयकी अपेक्षा सब पदार्थ अनित्य ही हैं और द्रव्यार्थिक नयकी अपेक्षा सब पदार्थ नित्य ही हैं॥ २-११॥

आगे अशरण भावनाका चिन्तवन करते हैं—

कण्ठीरवसमाक्रान्तकुरङ्गस्येव कानने।
यमाक्रान्तस्य जीवस्य नास्तीह शरणं क्वचित्॥ १२॥
माता स्वसा पिता पुत्रो भ्राताभ्रातृसुतोऽपि च।
एते सर्वे मिलित्वापि त्रायन्ते नैव मृत्युतः॥ १३॥
दावानलेन संव्याप्ते गहने पादपस्थितः।
दग्ध सर्वं विलोक्याप्य दग्धं स्वं मन्यते यथा॥ १४॥
तथैव निखिलं लोकं मृत्युव्याघ्रमुखस्थितम्।
दृष्ट्वापि हन्त मर्त्योऽयं स्वं स्वस्थ मन्यते मुधा॥ १५॥
निर्गते जीविते जीव गृहान् निःसारयन्ति हा।
बान्धवा मित्रवर्गाश्च नयन्ते शवशायनम्॥ १६॥
भस्मयन्ति मिलित्वा ते विलपन्ति रुदन्ति च।
विपद्यमानान् दृष्ट्वापि मृतः प्रत्येति न क्वचित्॥ १७॥
ससारस्य स्वभावोऽयमनादिनिधनो मतः।
उत्पद्यन्ते म्रियन्ते च जीवा भवमरुस्थले॥ १८॥
कोऽपि केनापि सार्धं नो याति वै प्रतियाति नो।
एक एव सुहृद् धर्मः सार्धं जीवेन गच्छति॥ १९॥
शैले वने तडागे वा शैलस्य शिखरेष्वपि।
धर्म एव परो बन्धुस्तरणं भववारिधेः॥ २०॥
आत्मन्नशरण मत्वा धर्मस्य शरणं व्रज।
धर्मादृते न कोऽप्यस्ति त्राता तव जगत्त्रये॥ २१॥

अर्थ—जिस प्रकार वनमे सिंहके द्वारा चपेटे हुए हरिणका कोई शरण—रक्षक नही है उसी प्रकार यमके द्वारा आक्रान्त जीवको कही कोई शरण नही है। माता, बहिन, पिता, पुत्र, भाई और भतीजा, ये सब

मिलकर भी मृत्युसे रक्षा नहीं कर सकते। दावानलसे व्याप्त वनमें वृक्ष-पर बैठा हुआ मनुष्य सबको जलता देखकर जिस प्रकार अपने आपको सुरक्षित मानता है उसी प्रकार यह मनुष्य समस्त लोकको मृत्युरूप व्याघ्रके मुखमें स्थित देखकर भी अपने आपको व्यर्थ ही स्वस्थ मानता है। प्राणोंके निकल जानेपर मनुष्य जीवको घरसे निकाल देते हैं और बान्धव तथा मित्रवर्ग श्मशानमे ले जाते हैं, मिलकर भस्म कर देते हैं, विलाप करते हैं और रोते हैं। सम्बन्धी जनोंको रोता चीखता देखकर कोई भी मृत व्यक्ति कहीं लौटकर नहीं आता। संसारका यह स्वभाव अनादिनिधन माना गया है। संसार रूपी मरुस्थलमें जीव उत्पन्न होते हैं और मरते हैं। कोई किसीके साथ नहीं जाता और न कोई लौटकर आता है। एक धर्मरूप मित्र ही जीवके साथ जाता है। पर्वतपर, वनमें, तालाबमे तथा पर्वतकी शिखरोपर धर्म ही उत्कृष्ट बान्धव-सहायक है, संसार सागरसे तारने वाला है। हे आत्मन्! अपने आपको अशरण मान धर्मकी ही शरणको प्राप्त हो। धर्मके बिना तीनो लोकोमें कोई भी तेरा रक्षक नही है॥ १२-२१॥

अब संसार भावनाका वर्णन करते हैं—

अस्मिन् भवार्णवे घोरे दुःखनीरौघसंभृते।
जन्ममृत्युमहानक्रकीर्णे व्याधितरङ्गके॥ २२॥
भ्रमन्तो दुःखसम्भारं चिरं सीदन्ति जन्तवः।
श्वभ्रतिर्यङ्मनुष्याणाममराणां च धामनि॥ २३॥
भूयोभूयो भ्रमित्वाहं श्रान्तदेहो बभूव हा।
एकस्यां श्वासवेलायामष्टादशवारकम्॥ २४॥
विपद्योत्पद्यमानोऽहमभजं घोरवेदनाम्।
नटवत्स्वामिभृत्यानां वेषस्य परिवर्तनम्॥ २५॥
दृष्ट्वा कथं विरक्तो नो जायते मर्त्य संचयः।
निर्धनो धनकाङ्क्षायाः सधना धनतृष्णया॥ २६॥
प्राप्नुवन्ति महादुःखं सुखी नास्त्यत्र कश्चन।
द्रव्यं क्षेत्रं तथा कालं भवं भावं च नित्यश॥ २७॥
पूर्णं करोति जीवोऽयं परावर्तनपञ्चकम्।
मृत्वा संजायते क्षिप्रं भूत्वा च म्रियते क्षणात्॥ २८॥
एको रोदिति सन्तानाभावतो भुवि भूरिशः।
अन्यो रोदिति दुर्दुःसंतानस्य समागमात्॥ २९॥

कस्यचिन्मृतिमायाति सुगुणः प्रियपुत्रकः।
कस्यचित् सुगुणाभार्या प्रयाता यममन्दिरम् ॥ ३० ॥
एकेन राज्यमालब्धमेकः सीदति कानने।
राज्यलक्ष्मीपरिभ्रष्टो विचित्रा भवपद्धतिः ॥ ३१ ॥
संसारस्य स्वरूपं ये चिन्तयित्वा स्वचेतसि।
विरक्ता भवभोगेभ्यो धन्यास्ते सन्ति भूतले ॥ ३२ ॥

अर्थ—दुख रूप जलसे परिपूर्ण, जन्ममृत्यु रूपी बड़े-बड़े मगरमच्छों से व्याप्त और रोगरूपी तरङ्गोंसे सहित इस भयंकर संसार सागरमें दुःख का भार ढोते हुए जीव चिरकालसे दुखी हो रहे हैं। बड़े दुःखकी बात है कि मैं नरक, तिर्यञ्च, मनुष्य और देवोके स्थान-स्वर्गमें बार-बार भ्रमणकर श्रान्त शरीर हो गया हूँ—थक गया हूँ। एक श्वासके समयमें अठारह बार जन्म मरण करते हुए मैंने घोर वेदना प्राप्त की है। नटके समान स्वामी और सेवकोका वेष परिवर्तन देखकर यह मनुष्योंका समूह विरक्त क्यो नही होता? निर्धन मनुष्य धनकी आकाङ्क्षासे और धनवान् मनुष्य धनकी तृष्णासे महान् दुख पा रहे हैं। इस जगत्में कोई सुखी नही है। यह जीव-द्रव्य, क्षेत्र, काल, भव और भाव इन पाँच परावर्तनोको पूर्ण करता रहता है। मरकर शीघ्र ही उत्पन्न होता है और उत्पन्न होकर शीघ्र ही मृत्युको प्राप्त होता है। पृथिवीपर एक मनुष्य सन्तानके अभावमे अत्यन्त रोता है तो कोई दुराचारी संतानके संयोगसे रोता है। किसीका गुणवान् प्रिय-पुत्र मृत्युको प्राप्त होता है तो किसीकी गुणवती स्त्री मर जाती है। एक पुरुषने राज्य प्राप्त किया और एक पुरुष राज्य लक्ष्मीसे भ्रष्ट हो वनमें दुःखी होता है, संसारकी पद्धति बडी विचित्र है। जो मनुष्य अपने मनमे संसारके स्वरूपका विचारकर संसार सम्बन्धी भोगोसे विरक्त होते हैं, पृथिवी तलपर वे ही धन्य हैं—सर्वश्रेष्ठ हैं ॥ २२-३२ ॥

आगे एकत्व भावनाका कथन करते हैं—

एक एवात्र जायेऽहमेक एव म्रिये तथा।
एको निर्वाणमायाति नास्त्यन्यः कोऽपि मे निजः ॥ ३३ ॥
यादृशे पुण्यपापे च कर्मणी विदधात्ययम्।
तादृशे सुखदुःखे च स्वयमाप्नोति मानवः ॥ ३४ ॥
दत्तं परेण नाप्नोति परस्मै नो ददाति च।
अन्योऽन्यव्यत्ययो नास्ति पुण्यपापाख्यकर्मणोः ॥ ३५ ॥

पिता नरकमायाति पुत्रो मोक्षं प्रयाति च।
स्वकृतं सर्वं आप्नोति दुरन्तेऽस्मिन् भवार्णवे ॥ ३६ ॥
अन्यस्य सुखसिद्ध्यर्थं कुरुते दुरितं जनः।
तत्फलं स्वयमाप्नोति नान्यः क्वापि कदाचन ॥ ३७ ॥
हे आत्मन् स्वहितं पश्य तदेव त्वत्सुखावहम्।
परदृष्टिस्त्वयात्याज्या सुखं वाञ्छसि चेद्ध्रुवम् ॥ ३८ ॥
अस्मिन्ननादिसंसारे स्वतन्त्राः सन्ति जन्तवः।
कर्तारः सन्ति सर्वेऽपि स्वभावस्यैव सर्वदा ॥ ३९ ॥
परः परस्यकर्तास्ति दृष्टिरेषा न शोभना।
इष्टानिष्टविकल्पानां जनकत्वाद्भवावहा ॥ ४० ॥
दृष्ट्वेष्टं सुखसम्पन्नं मोदन्ते रागिणो जनाः।
दृष्ट्वा च दुःखसम्पन्नं दूयन्ते नितरां हि ते ॥ ४१ ॥
रागद्वेषौ परित्यज्य परकीयेषु वस्तुषु।
वीतरागस्वभावे स्वमात्मनि सुस्थिरो भव ॥ ४२ ॥

अर्थ—इस जगत्‌में मैं अकेला ही उत्पन्न होता हूं, अकेला ही मरता हूं और अकेला ही निर्वाणको प्राप्त होता हूं, अन्य कोई व्यक्ति मेरा निजी नहीं है। यह मनुष्य जैसे पुण्य-पाप कर्म करता है वैसे ही सुख-दु:खको स्वयं प्राप्त होता है। यह मनुष्य न तो दूसरेके द्वारा दिये हुए को प्राप्त होता है और न दूसरेको देता है। पुण्य-पाप कर्मका परस्पर आदान-प्रदान नहीं होता। पिता नरकको प्राप्त होता है तो पुत्र मोक्षको जाता है। इस दु:खदायक संसार-सागरमें सब अपना किया हुआ ही प्राप्त करते हैं। दूसरेकी सुख-सिद्धिके लिए मनुष्य पाप करता है परन्तु उसका फल स्वयं प्राप्त करता है दूसरा कोई कहीं, कभी नहीं। हे आत्मन्! तू अपना हित देख, वही तेरे लिए सुखदायक होगा। यदि तू स्थायी सुख चाहता है तो तुझे परदृष्टि छोड़ने योग्य है। इस अनादि-संसारमें सब जीव स्वतन्त्र हैं, सभी सदा स्वभावके ही कर्ता हैं। पर, परका कर्ता है, यह दृष्टि—विचारधारा अच्छी नहीं है। इष्टानिष्ट विकल्पोंका जनक होनेसे संसारको बढ़ाने वाली है। इष्ट मनुष्यको सुखी देखकर रागी मनुष्य हर्षित होते हैं और दु:खी देखकर अत्यन्त दु:खी होते हैं। इसलिए पर-वस्तुओंमें राग, द्वेष छोड़कर वीतराग स्वभाव वाले आत्मामें—अपने आपमें स्थिर हो जा ॥ ३३-४२ ॥

अब अन्यत्वभावनाका चिन्तन करते हैं—

नाहं नोकर्मरूपोऽस्मि न च वै कर्मरूपकः।
नाहं रागादिरूपोऽहं न च ज्ञेयस्वरूपकः ॥ ४३ ॥
न गुणस्थानरूपोऽहं न च वै मार्गणामयः।
न शब्दोऽहं न वर्णोऽहं न च स्पर्शो न गन्धवान् ॥ ४४ ॥
न रसोऽहं न पुण्याढ्यो न च पापमयः क्वचित्।
एते सर्वे परद्रव्यसंजाता विविधात्मकाः ॥ ४५ ॥
अहं ज्ञानस्वभावोऽस्मि परतो भिन्न एव हि।
आत्मानं देहतो भिन्नं ये जानन्ति मुनीश्वरा ॥ ४६ ॥
त एव शिवमायान्ति कुर्वन्त' कर्मनिर्जराम्।
यदा देहोऽपि मे नास्ति जन्मतः प्राप्तसंगतिः ॥ ४७ ॥
तदा गेहादयो बाह्याः पदार्थाः सन्तु मे कथम्।
पुत्रभार्यादिषु भ्रान्ताः कुर्वाणा ममताश्रयम् ॥ ४८ ॥
'मे मे मे' इति कुर्वाणा बर्करा इव मानवा।
पतिता मोहपङ्केऽस्मिन् प्रविशन्ति मृतेर्मुखे ॥ ४९ ॥
यथा लोहस्य संसर्गादनलः पीड्यते घनैः।
तथा देहस्य संसर्गादात्माऽयं पीड्यते घनैः ॥ ५० ॥
जीवानामत्र सन्त्यत्र यावन्त्यो हि विपत्तयः।
तावन्त्यो निखिला ज्ञेया संयोगादेव देहिनाम् ॥ ५१ ॥
येषामात्मा पराच्च्युत्वा शुद्धाकाशनिभोऽभवत्।
त एव भगवत्सिद्धाः सुखिन सन्ति नेतरे ॥ ५२ ॥

अर्थ—निश्चयसे मैं नो कर्मरूप नही हूँ, कर्मरूप नही हूँ, रागादिरूप नही हूँ, ज्ञेयरूप नही हूँ, गुणस्थानरूप नही हूँ, मार्गणामय नही हूँ, शब्द नही हूँ, वर्ण नही हूँ, स्पर्श नही हूँ, गन्धवान् नही हूँ, रसरूप नहीं हूँ, पुण्य सहित नही हूँ और कही पाप सहित भी नही हूँ। ये सब नाना रूप परद्रव्यके सयोगसे उत्पन्न हुए हैं। मै ज्ञान स्वभावी हूं, परसे भिन्न ही हू जो मुनिराज शरीरसे भिन्न आत्माको जानते हैं वे ही कर्मोंकी निर्जरा करते हुए मोक्षको प्राप्त होते हैं। जब जन्मसे साथ लगा हुआ शरीर भी मेरा नही है तब घर आदि बाह्य पदार्थ मेरे कैसे हो सकते हैं? पुत्र तथा स्त्री आदिमे भूले मनुष्य ममताका आश्रय करते हुए 'मे मे मे' करने वाले बकरोंके समान मोहरूपी कर्दममे पड़कर मृत्युके मुखमे प्रवेश करते हैं—मर जाते हैं। जिस प्रकार लोहकी संगतिसे

अग्नि, घनोंके द्वारा पीटी जाती है उसी प्रकार देहकी संगतिसे यह आत्मा, कर्म रूपी घनोंके द्वारा पीटी जाती है। इस जगत्में जीवोंको जितने कष्ट हैं वे सब स्त्री पुत्रादि प्राणियोंके संयोगसे ही जानना चाहिये। जिनकी आत्मा परसे च्युत हो शुद्ध आकाशके समान हो गई है वे भगवंत सिद्ध परमेष्ठी ही लोकमें सुखी हैं ॥ ४३-५२ ॥

आगे अशुचित्व भावनाका चिन्तन करते हैं—

मातातातरजोवीर्यादुत्पत्तिर्यस्य जायते।
स देहः शुचितां यायात् कथमित्थं विचार्यताम् ॥ ५३ ॥
यः स्वभावादशुद्धोऽस्ति स शुद्धः स्यात्कथं परैः।
मलमूत्रमयो देहो सुन्दरचर्मणावृतः ॥ ५४ ॥
स्वर्णपत्रसमाच्छन्नमलपूर्णघटोपमः।
एतत्संगतिमासाद्य चित्रमाद्यन्ति मानवाः ॥ ५५ ॥
यदीय सङ्गमासाद्य वस्तून्यत्र शुचीन्यपि।
अशुचीन्येव जायन्ते स देहो रुच्यते कथम् ॥ ५६ ॥
शरीररागः सर्वेषां रागाणां मूलमुच्यते।
सर्वरागविरक्तिश्चेद् देहरागो विमुच्यताम् ॥ ५७ ॥
देहरागेण संयुक्ता न शक्ताः स्यु परीषहान्।
सोढुं क्षुधापिपासादीन् देहपीडाकरान् सदा ॥ ५८ ॥
इत्थंभूता नराः क्वापि मुनिदीक्षां चरन्ति नो।
मुनिदीक्षां बिना क्वापि मोक्षप्राप्तिर्न जायते ॥ ५९ ॥
यथार्थं सुखलिप्सा ते मानसे यदि वर्तते।
देहरागस्त्वया त्याज्यस्तर्हि मुक्तिप्रबाधकः ॥ ६० ॥
देहस्याशुचितां नित्यं भावयित्वा मुनीश्वराः।
देहरागं परित्यक्तुं समर्थाः सन्ति भूतले ॥ ६१ ॥
एते मुनीश्वरा एव कायक्लेशादिकं तपः।
कुर्वन्ति श्रद्धयोपेताः कर्मक्षयविधायकम् ॥ ६२ ॥

अर्थ—माता-पिताके रजवीर्यसे जिसकी उत्पत्ति होती है वह शरीर शुचिता—पवित्रताको कैसे प्राप्त हो सकता है, ऐसा विचार करना चाहिये? जो स्वभावसे अशुद्ध है वह दूसरे पदार्थोंसे शुद्ध कैसे हो सकता है? मलमूत्रमय शरीर सुन्दर चर्मसे ढका हुआ है अतः स्वर्णपत्रसे आच्छादित मलपूर्ण घड़ेके समान है। इस शरीरकी संगति पाकर मनुष्य मत्त होते हैं—अपने आपको भूल जाते हैं। यह आश्चर्य की बात

है, इस जगत्में जिसका सङ्ग पाकर अन्य पवित्र वस्तुएँ भी अपवित्र हो जाती हैं वह शरीर लोगोको कैसे रुचता है—अच्छा लगता है ? शरीरका राग ही सब रोगोका मूल कहा जाता है। यदि सब रागोसे विरक्ति हुई है तो शरीरका राग छोडना चाहिये। शरीरके रागसे सहित मनुष्य शरीरकी पीड़ा करने वाले क्षुधा, तृषा आदि परीषहोको सहन करनेमे सदा समर्थ नही हो सकते। ऐसे मनुष्य कही भी मुनि-दीक्षा धारण नही करते और मुनि-दीक्षाके बिना कही भी मोक्षकी प्राप्ति नही होती। हे आत्मन् ! यदि तेरे मनमे यथार्थ सुख प्राप्त करनेकी इच्छा है तो तुझे मुक्तिका बाधक शरीर सम्बन्धी राग छोड देना चाहिये। पृथिवीतलपर मुनिराज सदा शरीरकी अशुचिताका विचारकर शरीर सम्बन्धी रागके छोडनेमे समर्थ हैं। ये मुनिराज ही श्रद्धासे सहित हो कर्मक्षयकारक कायक्लेशादिक तप करते हैं ॥ ५३-६२ ॥

अब आस्रव भावनाका स्वरूप कहते हैं—

सच्छिद्रां नावमारुह्य यथा नो यान्ति मानवाः ।
स्वेष्ट धाम तथा लोकाः सास्रवा स्वेष्टधामकम् ॥ ६३ ॥

मनोवाक्कायचेष्टा या सैव योगः समुच्यते ।
योगेनैवास्रवत्यत्र विविधा कर्मसन्ततिः ॥ ६४ ॥

तस्यां स्थित्यनुभागौ च कषायोदयतो मतौ ।
यथा स्थित्यनुभागं च सा ददाति फलं नृणाम् ॥ ६५ ॥

कर्मोदयवशाज्जीवा चतुरन्तभवार्णवे ।
मज्जनोन्मज्जने नूनं कुर्वन्ति विभ्रमन्ति च ॥ ६६ ॥

एकान्तादिभेदेन मिथ्यात्वं पञ्चधा मतम् ।
अविरतिश्च विख्याता द्वादशभेदसंयुता ॥ ६७ ॥

भेदाः सन्ति प्रमादस्य दशधा पञ्चधापि च ।
कषायाणां प्रभेदा स्युः पञ्चविंशति संख्यकाः ॥ ६८ ॥

योगाः पञ्चदश प्रोक्ताः कर्मसिद्धान्तपारगैः ।
द्वासप्ततिमिताः प्रोक्ताः कर्मसिद्धान्तपारगैः ॥ ६९ ॥

एभ्यो रक्षा प्रकर्तव्या स्वात्मनः सततं नृभिः ।
आस्रवे सति जीवानां कल्याणं नैव सम्भवेत् ॥ ७० ॥

यथा यथाहि जीवोऽयं गुणस्थानेषु वर्तते ।
तथा तथा हि जीवस्य क्षीयन्ते स्वत आस्रवाः ॥ ७१ ॥

एवं चतुर्गते स्थाने सर्वास्रवनिरोधतः ।
अबन्धः पूर्णप्रकाशि क्षणान्मुक्तिं प्रयाति सः ॥ ७२ ॥

अर्थ—जिस प्रकार छिद्र सहित नावपर सवार हो मनुष्य अपने इष्ट स्थानको प्राप्त नहीं होते हैं उसी प्रकार आस्रव सहित मनुष्य अपने इष्ट स्थान—मोक्षको प्राप्त नहीं होते हैं। मन, वचन, कायकी जो चेष्टा—व्यापार है वही योग कहलाता है। इस योगके द्वारा ही आत्मामे विविध कर्मसमूहोंका आस्रव होता है। उन कर्मसमूहोंमें स्थिति और अनुभाग कषायके उदयसे होते हैं और स्थिति—अनुभागके अनुसार वे मनुष्योंको फल देते हैं। कर्मोदयके वशीभूत जीव चतुर्गतिरूप संसार सागरमें मज्जन और निमज्जन करते हुए, खेद है कि निरन्तर भ्रमण करते रहते हैं। एकान्त आदिके भेदसे मिथ्यात्व पाँच प्रकारका माना गया है, अविरतिके बारह भेद प्रसिद्ध हैं, प्रमादके पन्द्रह भेद हैं, कषायोंके पच्चीस प्रभेद हैं और योग पन्द्रह प्रकारके हैं। कर्मसिद्धान्तके पारगामी आचार्योंने ये ही सब आस्रवके बहत्तर भेद कहे हैं। मनुष्योंको इन आस्रवके भेदोंसे अपनी रक्षा करना चाहिये, क्योंकि आस्रवके रहते हुए जीवोंका कल्याण नहीं हो सकता है। जैसे-जैसे यह जीव गुणस्थानोंमें बढ़ता जाता है वैसे-वैसे ही उसके आस्रव अपने आप कम होते जाते हैं। इस प्रकार चौदहवें गुणस्थानमे सब आस्रवोंका अभाव हो जानेसे पूर्ण अबन्ध हो जाता है—बन्धका सर्वथा अभाव हो जाता है और तब यह आत्मा क्षणभरमें मुक्तिको प्राप्त हो जाता है ॥ ६३-७२ ॥

आगे संवर भावनाका चिन्तन करते हैं—

आस्रवस्य निरोधो यः संवरः स हि कथ्यते ।
संवरेण विना लोको नेष्टं स्थानं व्रजेत् क्वचित् ॥ ७३ ॥
सच्छिद्रपोतमारूढो जलस्यागमने सति ।
नियमेन बुडत्येव गभीरे सागरे यथा ॥ ७४ ॥
तथास्रवविनिर्भिन्नं गुणागारमधिष्ठितः ।
नियमेन पतत्येव भयावहे भवसागरे ॥ ७५ ॥
मनोवाक्कायगुप्तीनां त्रयेण दशधर्मतः ।
पञ्चभ्यः समितिभ्यश्च चारित्राणां च पञ्चकात् ॥ ७६ ॥
द्वादशभ्योऽनुप्रेक्षाभ्यो द्वाविंशत्या परीषहैः ।
संवरो जायते नूनं सम्यग्दृष्ट्या विशुद्धताम् ॥ ७७ ॥

मिथ्यादृशामबन्धोऽस्ति केषां चित्पुण्यकर्मणाम् ।
तीर्थकृत्प्रभृतीनां च संवरो नैव जायते ॥ ७८ ॥

तस्यैव बन्धविच्छेदे संवरो हि निगद्यते ।
संवरेण युता या हि निर्जरा कर्मणामिह ॥ ७९ ॥

सैव सार्थक्यमाप्नोति नान्या विग्रहधारिणाम् ।
समये समये जीवजातीनां कर्मणां चयः ॥ ८० ॥

बन्धमाप्नोति तावांश्च निर्जरामेति सर्वतः ।
सत्तायां विद्यते सार्धगुणहानिमितस्तथा ॥ ८१ ॥

मोहनिद्राशमात् साधुसङ्गस्य शुभदेशनात् ।
सम्यक्त्वं प्राप्यते भव्यैस्त्रिलोक्यामपि दुर्लभम् ॥ ८२ ॥

संवरमेव सम्प्राप्तुं प्रयत्नं कुरु सर्वदा ।
सवरमन्तरा न स्यात् कर्मणां क्षपण क्वचित् ॥ ८३ ॥

अर्थ—जो आस्रवका रुकना है वही सवर कहलाता है। संवरके बिना मनुष्य कहीं भी इष्टस्थानको प्राप्त नही हो सकता। सच्छिद्र जहाजपर बैठा मनुष्य जलका आगमन होने पर जिस प्रकार गहरे समुद्रमे नियमसे डूबता है, उसी प्रकार शुभ-अशुभ कर्मोंके आस्रवसे सहित शुभाचारको प्राप्त हुआ (मिथ्यादृष्टि) नियमसे भयपूर्ण संसार सागरमे पडता है। मनोगुप्ति, वचनगुप्ति, कायगुप्ति—इन तीन गुप्तियोसे, उत्तमक्षमादि दश धर्मोसे, पाँच समितियोसे, पाँच प्रकारके चारित्रोसे, बारह अनुप्रेक्षाओसे तथा बाईस परीषहजयोसे सम्यग्दृष्टि जीवोके निश्चय ही सवर होता है। मिथ्यादृष्टि जीवोके तीर्थङ्कर प्रकृति, आहारक शरीर तथा आहारक शरीराङ्गोपाङ्ग इन पुण्य प्रकृतियोका अबन्ध है, संवर नही, क्योकि बन्ध व्युच्छित्ति होने पर ही सवर कहलाता है। सवरके साथ जो कर्मोंकी निर्जरा होती है वही सार्थकताको प्राप्त होती है। वैसे तो सभी संसारी जीवोंके प्रत्येक समय जितना (सिद्धोके अनन्तवें भाग और अभव्यराशिसे अनन्तगुणित) कर्मसमूह बन्धको प्राप्त होता है, उतना ही सब ओरसे निर्जराको प्राप्त होता है और डेढ गुणहानि प्रमाण कर्मसमूह सत्तामे रहता है। मोहनिद्राके उपशम तथा साधुसङ्गके उपदेशसे भव्य जीव त्रिलोक दुर्लभ सम्यग्दर्शन को प्राप्त करते हैं। इसलिये हे आत्मन् ! संवरको ही प्राप्त करनेका सदा प्रयत्न करो, क्योकि संवरके बिना कर्मोंका क्षय कहीं कभी नही होता है ॥ ७३-८३ ॥

आगे निर्जरा भावनाका चिन्तन करते हैं—

कर्मणां पूर्वबद्धानामेकदेशस्य संक्षयः।
निर्जरा प्रोच्यते विज्ञैर्जैनागमविशारदैः॥ ८४॥
सविपाकाविपाकेतिभेदेन द्विविधा च सा।
आद्या भवति सर्वेषां द्वितीया स्यात्तपस्विनाम्॥ ८५॥
कर्मस्थित्यनुसारेणाबाधाकाले समागते।
ददतः स्वफलं कर्म-प्रदेशाः संचिताः स्वयम्॥ ८६॥
पृथग् भवन्ति जीवेभ्यः सविपाका मता श्रुतौ।
प्रभावात् तपसां केचिदाबाधा पूर्वमेव हि॥ ८७॥
निर्जीर्णा यत्र जायन्ते सा मता ह्यविपाकजा।
अविपाकाप्रभावेण जीवा आयान्ति निर्वृतिम्॥ ८८॥
सविपाकाप्रभावात्तु तिष्ठन्त्यत्रैव विष्टपे।
अनशनादिभेदेन तपांसि सन्ति द्वादश॥ ८९॥
तान्येव सूरिभिः प्रोक्ता अविपाकासुहेतवः।
हेतौ सत्येव सिद्ध्यन्ति कार्याणि न तु तं विना॥ ९०॥
आत्मन्! वाञ्छसि चेद्दुःखपरिमोक्षं समन्ततः।
सद्यः कुरु तपांसि त्वं यथाकालं यथाबलम्॥ ९१॥
अग्नितप्तं यथा हेमनिर्मलं जायते द्रुतम्।
तपस्तप्तस्तथात्मायं निर्मलो भवति ध्रुवम्॥ ९२॥
अनादितो निबद्धानि कर्माणि तपसा विना।
क्षीयन्ते नैव जीवानां वाञ्छतामपि नित्यशः॥ ९३॥

अर्थ—जैनागमके ज्ञाता विद्वानों द्वारा, पूर्वबद्ध कर्मोंके एकदेशका क्षय होना निर्जरा कही जाती है। यह निर्जरा सविपाका और अविपाकाके भेदसे दो प्रकारकी होती है। सविपाका निर्जरा सभी जीवोंके होती है परन्तु अविपाका निर्जरा तपस्वियों—मुनियोंके होती है। कर्मस्थितिके अनुसार आबाधाकाल आनेपर संचित कर्मप्रदेश अपना फल देते हुए जीवोंसे जो स्वयं पृथक् हो जाते हैं, यह निर्जरा शास्त्रोंमें सविपाका मानी गई है और जिससे तपके प्रभावसे कितने ही कर्मप्रदेश आबाधाके पूर्व ही निर्जीर्ण हो जाते हैं वह अविपाकजा निर्जरा मानी गई है। अविपाक निर्जराके प्रभावसे जीव निर्वाणको प्राप्त होते हैं और सविपाक निर्जराके प्रभावसे इसी संसारमें स्थित रहते हैं। अनशनादिके भेदसे तप बारह हैं, ये तप ही आचार्योंने अविपाक निर्जरा

के हेतु कहे हैं। हेतुके रहते हुए ही कार्य होते हैं हेतुके बिना नहीं। हे आत्मन्! यदि तू सब ओरसे दुःखोंसे छुटकारा चाहता है तो समय और शक्तिके अनुसार शीघ्र ही तप कर। जिस प्रकार अग्निसे संतप्त स्वर्ण शीघ्र ही निर्मल हो जाता है उसी प्रकार तपसे संतप्त यह आत्मा निश्चित ही निर्मल हो जाती है। जीव निरन्तर चाहे भी, तो भी उनके अनादिकालसे बँधे हुए कर्म तपके बिना नष्ट नहीं होते हैं ॥ ८४-९३ ॥

अब लोक भावनाका चिन्तन करते हैं—

पादौ प्रसार्य भूपृष्ठे बाहू निक्षिप्य मध्यके।
स्थितमर्त्यसमाकारो लोकोऽयं विद्यते सदा ॥ ९४ ॥
न केनापि कृतो लोको न हर्तुं शक्य एव हि।
अनादिनिधनो ह्येष वातत्रयसमावृतः ॥ ९५ ॥
अधोमध्योर्ध्वभेदेन लोकोऽयं त्रिविधो मतः।
श्वाभ्रा वसन्त्यधो लोके मध्यलोके च मानवाः ॥ ९६ ॥
निलिम्पा ऊर्ध्वसम्भागे तिर्यञ्चः सन्ति सर्वतः।
अयं सुविस्तृतो लोको निचितो जीवराशिभिः ॥ ९७ ॥
एकोऽपि स प्रदेशो न विद्यते भुवनत्रये।
यत्राहं न समुत्पन्नो यत्र वै न च सम्मृतः ॥ ९८ ॥
हा हा क्षेत्रपरावर्ते सर्वत्र भ्रमितो भृशम्।
जन्ममृत्युमहादुःखमभजं भूरिशोऽप्यहम् ॥ ९९ ॥
लोकरूपं विचिन्त्यात्र ये विरक्ता भवन्त्यतः।
त एव कर्मनिर्मुक्ता लोकाग्रे निवसन्ति हि ॥ १०० ॥
सरित्कूलादिसौन्दर्यं राजतीं चन्द्रिकाविभाम्।
सूर्योदयस्य लालित्यं निर्झरास्फालनं तथा ॥ १०१ ॥
दृष्ट्वा रज्यन्ति भूभागे तत्रैव विहरन्ति च।
निर्जलां वृक्षहीनां च मरुभूमिं विलोक्य ये ॥ १०२ ॥
द्विषन्ते मानवास्तेऽत्र रागद्वेषवशं गताः।
उत्पद्यन्ते म्रियन्ते च तत्रैव भुवनत्रये ॥ १०३ ॥

अर्थ—पृथिवीपर दोनों पैर फैलाकर तथा दोनों हाथ कमरपर रखकर खड़े हुए पुरुषका जैसा आकार होता है वैसा ही आकार वाला यह लोक सदासे विद्यमान है। यह लोक न तो किसीके द्वारा किया गया है और न किसीके द्वारा नष्ट किया जा सकता है। अनादि निधन और तीन वातवलयोंसे वेष्टित—घिरा हुआ है। अधोलोक, मध्य-

लोक और ऊर्ध्वलोकके भेदसे यह तीन प्रकारका माना गया है। अधो-लोकमें नारकी रहते हैं, मध्यलोकमे मनुष्य रहते हैं, ऊर्ध्वलोकमे देव रहते हैं और तिर्यञ्च सभी लोकोमे रहते हैं। यह अत्यन्त विस्तृत लोक जीवराशिसे व्याप्त है। तीनो लोकोमें वह एक भी प्रदेश नही है जहाँ मैं उत्पन्न नहीं हुआ हूँ और मरा नही हूँ। बड़े दु:खकी बात है कि क्षेत्र परावर्तनमे मैं सर्वत्र अनेक बार घूम चुका हूँ। मैंने जन्म और मृत्युका महान् दुःख अनेक बार प्राप्त किया है। इस तरह लोकका स्वरूप विचार कर जो उससे विरक्त होते हैं वे ही कर्मरहित हो लोकके अग्र-भागपर निवास करते हैं और जो नदी तथा पर्वतोंका सौन्दर्य, चाँदीके समान चाँदनीकी प्रभा, सूर्योदयकी सुन्दरता और झरनोंके प्रपातको देखकर किसी प्रदेशमे राग करते हैं तथा वहीं विहार करते हैं एवं निर्जल तथा वृक्षहीन मरुभूमिको देखकर द्वेष करते है, रागद्वेषके वशी-भूत हुए वे मनुष्य इन्ही तीनों लोकोमें उत्पन्न होते और मरते रहते हैं॥ ९४-१०३॥

आगे बोधिदुर्लभ भावनाका चिन्तवन करते हैं—

लोकोऽयं सर्वतो व्याप्तः स्थावरजीवराशिभिः।
स्थावरात् त्रसताप्राप्तिर्दुर्लभा वर्ततेतराम्॥ १०४॥

त्रसतायां च संज्ञित्वं संज्ञित्वे च मनुष्यता।
मनुष्यत्वे च सत्क्षेत्रं सत्क्षेत्रे च कुलीनता॥ १०५॥

कुलीनतायामारोग्यमारोग्ये दीर्घजीविता।
तत्र सम्यक्त्वसंप्राप्तिस्तत्राप्तात्मनि लक्ष्यता॥ १०६॥

तत्राप्यदोषचारित्वं दुर्लभं ह्यतिदुर्लभम्।
एवं विचार्य सद्बोधेर्दौर्लभ्यं तत् सुरक्ष्यताम्॥ १०७॥

यथेह दुर्लभं ज्ञात्वा मणिमुक्तादिकं नराः।
रक्षन्ति तत्परत्वेन बोधी रक्ष्यस्त्वया तथा॥ १०८॥

बोधी रत्नत्रयं नाम दुर्लभं वर्तते नृणाम्।
एकादशाद् गुणस्थानात् पतिताः साधवो ह्यधः॥ १०९॥

अर्धपुद्गलपर्यन्तं पर्यटन्ति भवेभवे।
केचिच्चान्तर्मुहूर्तेन लब्ध्वा रत्नत्रयं निधिम्॥ ११०॥

प्राप्नुवन्ति शिवं सद्यः स्वात्मन्येव रता नराः।
परिणामस्य वैचित्र्यं कथयत्येव दृश्यते॥ १११॥

भोगाकांक्षाविशाला ते न पूर्णा देवपर्यये।
सागरोपमजीवित्वे सर्वसाधनसंयुते ॥ ११२ ॥
अल्पायुषि नरत्वे सा पूर्यते कथमत्र सा।
ततो विरज्य भोगेभ्यः स्वस्मिन्नेव रतो भव ॥ ११३ ॥

अर्थ—यह लोक सब ओर स्थावर जीवोंके समूहसे व्याप्त है। स्थावरसे त्रस पर्यायकी प्राप्ति अत्यन्त दुर्लभ है। त्रस पर्यायमें संज्ञीपना, संज्ञियोंमें मनुष्यता, मनुष्यतामें अच्छा क्षेत्र, अच्छे क्षेत्रमें कुलीनता, कुलीनतामें आरोग्य, आरोग्यमें दीर्घायुष्य, दीर्घायुष्यमें सम्यक्त्वकी प्राप्ति, सम्यक्त्व प्राप्तिमें आत्माका लक्ष्य और आत्माके लक्ष्यमें निर्दोष चारित्रका पालन करना अत्यन्त दुर्लभ है। इस प्रकार सद्बोधि की दुर्लभताका विचारकर उसकी रक्षा करना चाहिये। जिस प्रकार मनुष्य मणि, मुक्ता आदिको दुर्लभ जानकर तत्परतासे उसकी रक्षा करते हैं उसी प्रकार बोधिको दुर्लभ जान उसकी रक्षा करना चाहिये। बोधि रत्नत्रयका नाम है। यह मनुष्योंके लिये दुर्लभ है। ग्यारहवें गुणस्थानसे नीचे गिरे हुए मनुष्य अर्धपुद्गल परिवर्तन पर्यन्त अनेक भवोंमें घूमते रहते हैं और कोई रत्नत्रय रूप निधिको प्राप्त कर स्वात्मामें लीन रहने वाले मनुष्य अन्तर्मुहूर्तके भीतर शीघ्र ही मोक्षको प्राप्त कर लेते हैं। परिणामोंकी यह विचित्रता छद्मस्थ जीव नहीं जान पाते। जहाँ सागरों प्रमाण आयु थी तथा सब साधन सुलभ थे ऐसी देवपर्यायमें तेरी विशाल भोगाकांक्षा पूर्ण नहीं हुई तो अल्पायु वाले मनुष्य पर्यायमें कैसे पूर्ण हो सकती है? अतः हे आत्मन्! तूं भोगोंसे विरक्त हो, स्वकीय आत्मामें ही रत—लीन हो जा ॥ १०४-११३ ॥

आगे धर्म भावनाका स्वरूप कहते हैं—

कान्तारे मार्गतो भ्रष्टं समुद्रे पतितं तथा।
दारिद्र्याब्धितले मग्नं शैलात्संपतितं नरम् ॥ ११४ ॥
रक्षितुं धर्मएवास्ति शक्तो नान्योऽत्र भूतले।
धर्मो मूलं त्रिवर्गस्य त्रिवर्गः सुखसाधनम् ॥ ११५ ॥
मूलस्य रक्षणं कार्यं मूलनाशे कुतः सुखम्।
आत्मनो यः स्वभावोऽस्ति स धर्मः प्रोच्यते बुधैः ॥ ११६ ॥
रत्नत्रये क्षमाद्याश्च धर्मशब्देन कीर्तिताः।
धर्मादेव मनुष्याणां जीवनं सफलं भवेत् ॥ ११७ ॥

धर्महीना न शोभन्ते निर्गन्धा इव किंशुकाः।
सम्यक्त्वमूलो धर्मोऽस्ति मूलं रक्ष्यं ततो नृभि. ॥ ११८ ॥

सम्यक्त्ववन्तो ये जीवा चारित्रं दधते परम्।
ते द्रुतं शिवमायान्ति स्थायिसौख्यसमन्वितम् ॥ ११९ ॥

ये नरा धर्ममाधृत्य भोगाकांक्षां धरन्ति च।
ते नूनं काचखण्डेन विक्रीणन्ति महामणिम् ॥ १२० ॥

भोगाकांक्षामहानद्यां वहमाना नराः सदा।
अन्ते निगोदनामानं महाब्धि प्रविशन्ति वं ॥ १२१ ॥

दुर्लभं मानुषं लब्ध्वा धर्मेण सफलीकुरु।
समुद्रे पतितं रत्नं यथा भवति दुर्लभम् ॥ १२२ ॥

तथा गतं मनुष्यत्वं दुर्लभं ह्येव वर्तते।
विपद्ग्रस्तं नरं लोके धर्मो रक्षति रक्षितः ॥ १२३ ॥

अर्थ—वनमे मार्गसे भ्रष्ट, समुद्रमे पतित, दरिद्रतारूपी समुद्रके तलमे निमग्न और पर्वतसे गिरे हुए मनुष्यको रक्षा करनेके लिए पृथिवीपर धर्म ही समर्थ है अन्य कोई नही। धर्म, त्रिवर्गका मूल है और त्रिवर्ग—धर्म, अर्थ, काम-सुखका साधन है। अत मूलको रक्षा करना चाहिये क्योकि मूलका नाश होनेपर सुख किससे हो सकता है? आत्माका जो स्वभाव है वही ज्ञानीजनो द्वारा धर्म कहा जाता है। रत्नत्रय और क्षमा आदिक भी धर्म शब्दसे कहे जाते हैं। धर्मसे ही मनुष्योका जीवन सफल होता है। धर्महीन मनुष्य गन्धरहित टेसूके फूलके समान शोभित नही होते। धर्म, सम्यक्त्वमूलक है अत मनुष्यो-को मूलकी रक्षा करना चाहिये। जो सम्यग्दृष्टि मनुष्य उत्तम चारित्र धारण करते हैं वे शीघ्र ही शाश्वत सुखसे सहित मोक्षको प्राप्त होते हैं। जो मनुष्य धर्म धारण कर उसके बदले भोगोकी आकाक्षा रखते हैं वे निश्चित ही कांचके टुकड़ेसे महामणिको बेचते हैं। निरन्तर भोगा-काङ्क्षारूपी महानदीमे बहने वाले मनुष्य अन्तमे निगोद नामक महा-सागरमे प्रवेश करते हैं। दुर्लभ मनुष्य पर्यायको प्राप्त कर उसे धर्मसे सफल करो। समुद्रमें पड़ा हुआ रत्न जिस प्रकार दुर्लभ होता है उसी प्रकार गया हुआ मनुष्य भव दुर्लभ है। रक्षा किया हुआ धर्म ही लोकमे विपत्तिग्रस्त मनुष्यकी रक्षा करता है ॥ ११४-१२३ ॥

आगे अनुप्रेक्षाधिकारका समापन करते हैं—

[1]भव्या इमा द्वादशभावना ये
स्थिरेण चित्तेन हि भावयन्ति।
नैर्ग्रन्थ्यमुद्रापरिरक्षणे ते
शक्ता भवेयुर्नियमेन भव्याः ॥ १२४ ॥

अर्थ—जो भव्य पुरुष, स्थिर चित्तसे इन उत्तम बारह भावनाओंका चिन्तवन करते हैं वे नियमसे निर्ग्रन्थ मुद्राकी रक्षा करनेमे समर्थ होते हैं ॥ १२४ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे अनुप्रेक्षाओंका वर्णन करने वाला अष्टम प्रकाश पूर्ण हुआ।

नवम प्रकाश

ध्यान सामग्री

मङ्गलाचरणम्

ध्यानेन भित्त्वा भवबन्धनानि
रागादिदोषोग्रनिबन्धनानि।
प्रापुः प्रियां मुक्तिमनस्विनीं ये
सिद्धान् विशुद्धान् सततं नुमस्तान् ॥ १ ॥

अर्थ—जो ध्यानके द्वारा रागादि दोषरूप तीव्र कारणोसे मुक्त ससारके बन्धनोको तोडकर मुक्तिरूपी गौरवशालिनी प्रियाको प्राप्त कर चुके हैं, मैं विशुद्ध परिणामोसे युक्त उन सिद्ध परमेष्ठियोको बार-बार स्तुत करता हूं ॥ १ ॥

अब चित्तकी स्थिरताके लिये ध्यानकी सामग्रीका वर्णन करते हैं—

अथ वक्ष्ये गुणस्थानं मार्गणासु यथाक्रमम्।
ध्यान तत्त्वस्य सिद्ध्यर्थं यथाबुद्धि यथागमम् ॥ २ ॥

1. श्रेष्ठा.।

नरकगतौ भवेदाद्यं गुणस्थानचतुष्टयम् ।
अपर्याप्ते न विद्येत द्वितीयं च तृतीयकम् ॥ ३ ॥
द्वितीयादिपृथिव्यां त्वपर्याप्ते प्रथमं मतम् ।
पर्याप्तेषु हि जायेत गुणधामचतुष्टयम् ॥ ४ ॥

तिर्यग्गतौ भवेदाद्यं गुणस्थानोयपञ्चकम् ।
अपर्याप्तेषु जायेत वर्जयित्वा तृतीयकम् ॥ ५ ॥
आद्यं चतुष्टयं ज्ञेयं भोगभूमिभवेषु वै ।
कर्मभूमिजतिर्यक्षु पर्याप्तेषु तु पञ्चकम् ॥ ६ ॥

अपर्याप्ते तृतीयं नो जातुचिदपि सम्भवेत् ।
कर्मभूमिजमर्त्येषु सर्वाण्यपि भवन्ति हि ॥ ७ ॥
अपर्याप्तेषु विज्ञेयमाद्यं चापि द्वितीयकम् ।
चतुर्थञ्च समुद्घातगतकेवलिनो मतम् ॥ ८ ॥

त्रयोदशं गुणस्थानं देवेष्वाद्यचतुष्टयम् ।
अपर्याप्तेषु विज्ञेयं तृतीयस्थानमन्तरा ॥ ९ ॥

अर्थ—अब आगे ध्यानतत्त्वकी सिद्धिके लिये यथाबुद्धि और यथागम मार्गणाओंमें गुणस्थानोंका कथन करूँगा। प्रथम ही गतिमार्गणाकी अपेक्षा कहते हैं—सामान्यरूपसे नरकगतिमे आदिके चार गुणस्थान होते हैं किन्तु अपर्याप्त नारकियोंके द्वितीय और तृतीय गुणस्थान नहीं होता [इसका कारण है कि तृतीय गुणस्थानमे मरण नहीं होता और द्वितीय गुणस्थानमें मरा जीव नरक नही जाता। यह प्रथम पृथिवीके अपर्याप्तकोंकी अपेक्षा कथन है]। द्वितीयादि पृथिवियोंके अपर्याप्तकोंके प्रथम गुणस्थान ही होता है क्योंकि सम्यग्दृष्टि जीवकी उनमें उत्पत्ति नहीं होती। पर्याप्तकोंके चार गुणस्थान होते हैं।

तिर्यञ्चगतिमे आदिके पांच गुणस्थान होते हैं परन्तु अपर्याप्तकोंके तृतीय गुणस्थान नहीं होता। भोगभूमिज तिर्यञ्चोंमे आदिके चार गुणस्थान होते हैं परन्तु अपर्याप्तक अवस्थामे तृतीय गुणस्थान सम्भव नही है। कर्मभूमिज तिर्यञ्चोंमे पर्याप्तकोंके आदिके पांच गुणस्थान हैं। परन्तु अपर्याप्तकोंके तृतीय गुणस्थान कभी नही होता।

मनुष्यगतिमें कर्मभूमिज मनुष्योंमे सभी चौदह गुणस्थान होते है। परन्तु अपर्याप्तकोंके प्रथम, द्वितीय, चतुर्थ और समुद्घातगत केवलीकी अपेक्षा त्रयोदश—तेरहवाँ गुणस्थान होता है। भोगभूमिज मनुष्यो-

मे आदिके चार गुणस्थान होते हैं परन्तु अपर्याप्तक अवस्थामे तृतीय गुणस्थान नही होता।

देवोके आदिके चार गुणस्थान होते हैं परन्तु अपर्याप्तकोमे तृतीय गुणस्थान नही होता ॥ २-९ ॥

आगे इन्द्रिय और कायमार्गणाकी अपेक्षा वर्णन करते हैं—

एकेन्द्रिये तु विज्ञेयं तेजो वायुविवर्जिते।
आद्यद्वयं गुणस्थानमपर्याप्तदशायुते ॥ १० ॥
द्विहृषीकातसमारभ्या संज्ञिपञ्चेन्द्रियावधौ।
गुणस्थानं भवेदाद्य नान्यत्तत्र हि सम्भवेत् ॥ ११ ॥
पञ्चेन्द्रियेषु सन्त्येव धामानि निखिलान्यपि।
स्थावरेषु भवेदाद्य-द्वय नान्यत् प्रजापतेः ॥ १२ ॥
त्रसेषु सन्ति सर्वाणि गुणधामानि निश्चयात्।

अर्थ—तेजस्कायिक और वायुकायिकको छोड़कर अन्य एकेन्द्रियोके अपर्याप्तक दशामे आदिके दो गुणस्थान होते हैं। कारण यह है कि सासादन गुणस्थानमे मरा जीव यदि एकेन्द्रियोमे उत्पन्न हो तो तेजस्कायिक और वायुकायिकमे उत्पन्न नही होता। सासादन गुणस्थान अपर्याप्तक अवस्थामे ही रहता है। पर्याप्तक होते होते सासादन गुणस्थान विघट जाता है। द्वीन्द्रियसे लेकर असज्ञी पञ्चन्द्रिय तक प्रथम गुणस्थान ही होता है अन्य गुणस्थान सम्भव नही हैं [द्वितीय गुणस्थानमे मरण कर विकलत्रयोमे उत्पन्न होने वाले जीवोके अपर्याप्तक अवस्थामे द्वितीय गुणस्थान भी सम्भव होता है]। पञ्चेन्द्रियोमे सभी गुणस्थान होते है। स्थावरोमे आदिके दो गुणस्थान सम्भव है अन्य नही। त्रसोमे निश्चयसे सभी गुणस्थान होते है ॥ १०-१२ ॥

आगे योग मार्गणाकी अपेक्षा चर्चा करते हैं—

चतुर्षु चित्तयोगेषु वाग्योगेषु तथैव च ॥ १३ ॥
गुणस्थानानि सन्त्यत्र प्रथमाद् यावद् द्वादशम्।
सत्यानुभययोगेषु वचोमानसयोस्तथा ॥ १४ ॥
आद्यत्रयोदश ज्ञेया गुणस्थानसमूहकाः।
औरालमिश्रके बोध्यमाद्य चापि द्वितीयकम् ॥ १५ ॥
चतुर्थं चापि जीवानां सयोगे च त्रयोदशम्।
औदारिके तु बोध्यानि तान्याद्यानि त्रयोदश ॥ १६ ॥

आहारके तन्मिश्रे च षष्ठमेकं भवेदिह ।
वैक्रियिके भवेदाद्यं गुणस्थानचतुष्टयम् ॥ १७ ॥
तन्मिश्रे ननु विज्ञेयं तृतीयस्थानमन्तरा ।
कार्मणे काययोगे च प्रथमं च द्वितीयकम् ॥ १८ ॥
चतुर्थं च समुद्घातगतकेवल्यपेक्षया ।
त्रयोदशं भवेज्ज्ञातु समयत्रितयावधि ॥ १९ ॥

अर्थ—चार मनोयोगों और चार वचनयोगोमें प्रथमसे लेकर द्वादश तक गुणस्थान होते हैं। सत्य मनोयोग और अनुभय मनोयोग तथा सत्य वचनयोग और अनुभय वचनयोगमे आदिके तेरह गुणस्थान होते हैं। औदारिक मिश्रकाययोगमें पहला, दूसरा, चौथा और कपाट समुद्घात गतसयोग केवलीकी अपेक्षा तेरहवां गुणस्थान होता है। औदारिक काययोगमे आदिके तेरह गुणस्थान जानना चाहिये। आहारक और आहारकमिश्र काययोगमे एक छठवां हो गुणस्थान होता है। वैक्रियिक काययोगमे आदिके चार गुणस्थान होते हैं परन्तु वैक्रियिक मिश्र काययोगमे तृतोय गुणस्थान नही होता और कार्मण काययोगमे पहला, दूसरा, चौथा और समुद्घात केवलीको अपेक्षा तेरहवां गुणस्थान होता है। कार्मण काययोग अधिकसे अधिक तोन समय तक ही रहता है॥ १३-१९ ॥

आगे वेद, कषाय और ज्ञान मार्गणामे गुणस्थानोका वर्णन करते हैं—

आद्यानि स्यु सवेदानां नवधामानि भावतः ।
द्रव्यस्त्रीणां तु विज्ञेयं प्रथमात्पञ्चमावधिः ॥ २० ॥
सकषायस्य जीवस्य दशधामानि सन्ति हि ।
निष्कषायस्य बोध्यान्येकादशप्रभृतीनि वै ॥ २१ ॥
मतिश्रुतावधिज्ञाने चतुर्थाद्द्वादशावधिम् ।
मनःपर्ययबोधे तु षष्ठाच्च द्वादशावधिम् ॥ २२ ॥
केवले च भवेदस्य युगलं गुणधामकम् ।
कुमतौ कुश्रुते ज्ञाने विभङ्गे च नियोगतः ॥ २३ ॥
प्रथमं द्वितयं ज्ञेयं गुणस्थानं शरीरिणाम् ।

अर्थ—भाव वेदकी अपेक्षा सवेद जीवोके आदिके नौ गुणस्थान होते हैं परन्तु द्रव्य स्त्रियोंके प्रथमसे लेकर पञ्चम तक गुणस्थान होते हैं। कषाय सहित जीवोंके प्रारम्भके दश गुणस्थान होते हैं और कषाय रहित जीवोंके एकादश आदि गुणस्थान होते हैं। मतिज्ञान, श्रुतज्ञान

और अवधिज्ञानमें चतुर्थसे लेकर बारहवे तक गुणस्थान होते हैं। मनःपर्यय ज्ञानमे षष्ठ गुणस्थानसे लेकर बारहवें गुणस्थान तक सात गुणस्थान होते हैं। केवलज्ञानमे अन्तके दो गुणस्थान होते हैं। कुमति, कुश्रुत और विभङ्ग ज्ञानमे आदिके दो गुणस्थान होते हैं [तृतीय गुणस्थानमे मिश्र ज्ञान होता है] ॥ २०-२३ ॥

आगे संयम मार्गणामे गुणस्थान कहते हैं—

> सामायिके तथा छेदोपस्थापननुसंयमे ॥ २४ ॥
> षष्ठान्नवमपर्यन्तं गुणस्थानं प्रवेविह ।
> परिहारविशुद्धौ तु षष्ठं च सप्तमं स्मृतम् ॥ २५ ॥
> सूक्ष्मादिसाम्पराये च दशमं ह्येकमेव तु ।
> एकादशादितो ज्ञेयं यथाख्याताह्व संयमे ॥ २६ ॥
> संयमासंयमे ह्येक पञ्चमं बामसंमतम् ।
> असंयमे तु चत्वारि प्रथमादीनि सन्ति हि ॥ २७ ॥

अर्थ—सामायिक और छेदोपस्थापन संयममे छठवेसे लेकर नौवें तक गुणस्थान होते हैं। परिहार विशुद्धिमें छठवाँ और सातवाँ गुणस्थान होता है । सूक्ष्मसापरायमें एक दशम गुणस्थान ही होता है और यथाख्यात संयममे एकादश आदि गुणस्थान हैं। संयमासंयममे एक पञ्चम गुणस्थान और असयममे प्रथमसे लेकर चतुर्थ तक चार गुणस्थान होते हैं ॥ २४-२७ ॥

आगे दर्शन, लेश्या और भव्यत्व मार्गणामें गुणस्थान कहते हैं—

> लोचनदर्शने चाप्यचक्षुर्दर्शन के तथा।
> आदितो द्वादशं यावत् गुणधामानि सन्ति वै ॥ २८ ॥
> अवधिदर्शनं ज्ञेय चतुर्थाद् द्वादशावधिम् ।
> केवलदर्शने ज्ञेयमन्तिमद्वितय तथा ॥ २९ ॥
> कृष्णा नीला च कापोता प्रथमात् स्यात्तुर्यावधिम् ।
> पीता पद्मा च विज्ञेया प्रथमात्सप्तमावधिम् ॥ ३० ॥
> शुक्ला लेश्या च विज्ञेया ह्याद्यात् यावत् त्रयोदशम् ।
> भव्यत्वे गुणधामानि भवन्ति निखिलान्यपि ॥ ३१ ॥
> अभव्ये प्रथमं ज्ञेयं नियमाद् भववासिनि ।

अर्थ—चक्षुदर्शन और अचक्षुदर्शनमे प्रारम्भसे लेकर बारहवें गुणस्थान तक बारह गुणस्थान होते हैं। अवधि दर्शनमे चतुर्थसे लेकर

बारहवें तक गुणस्थान होते हैं और केवल दर्शनमें अन्तके दो गुणस्थान माने जाते हैं। कृष्ण, नील और कापोत लेश्या प्रथमसे चतुर्थ गुणस्थान तक होती है। पीत और पद्म लेश्या प्रथमसे सप्तम तक होती है और शुक्ल लेश्या प्रथमसे तेरहवें गुणस्थान तक होती है। भव्यत्व मार्गणामे सभी गुणस्थान होते हैं परन्तु सदा संसारमें ही निवास करने वाली अभव्यत्व मार्गणामें नियमसे पहला ही गुणस्थान होता है ॥ २८-३१ ॥

आगे सम्यक्त्व, संज्ञी और आहारक मार्गणामें गुणस्थान बताते हैं—

आद्योपशमसम्यक्त्वे क्षायोपशमिके तथा ॥ ३२ ॥
चतुर्थात्सप्तमान्तानि गुणस्थानानि सन्ति वै ।
क्षायिके तु चतुर्थादिनिखिलान्यपि भवन्ति हि ॥ ३३ ॥
द्वितीयोपशमे ज्ञेयं तुर्यादेकादशावधिम् ।
संज्ञिनि गुणधामानि भवन्ति द्वादशावधिम् ॥ ३४ ॥
असंज्ञिनि भवेदाद्यं केवलिनोर्नास्ति तद्द्वयम् ।
अनाहारे भवेदाद्यं द्वितीयं च चतुर्थकम् ॥ ३५ ॥
चतुर्दशं च विज्ञेयमाहारस्य निरोधतः ।
आहारके तु बोध्यानि ह्याद्यान्येव त्रयोदश ॥ ३६ ॥
इत्थं च मार्गणास्थाने गुणस्थाननिदर्शनम् ।
संक्षेपाद्विहितं चिन्त्यं ध्यानस्थेन सुयोगिना ॥ ३७ ॥
एवं चिन्तयतश्चित्तं विषयेभ्यो निवर्तते ।
निर्जरा विपुला च स्यात् कर्मणां दुःखदायिनाम् ॥ ३८ ॥

अर्थ—प्रथमोपशम सम्यक्त्व और क्षायोपशमिक सम्यक्त्वमें चतुर्थसे लेकर सप्तम तक गुणस्थान होते हैं। क्षायिक सम्यग्दर्शनमें चतुर्थसे लेकर सभी गुणस्थान हैं और द्वितीयोपशम सम्यक्त्वमें चतुर्थसे लेकर एकादश तक गुणस्थान होते हैं [सम्यक्त्व मार्गणाके भेद सम्यग्मिथ्यात्वमे तृतीय, सासादनमें द्वितीय और मिथ्यात्वमे प्रथम गुणस्थान जानना चाहिये]। संज्ञी मार्गणामे प्रथमसे लेकर बारहवें गुणस्थान तक बारह और असंज्ञी मार्गणामें प्रथम गुणस्थान ही होता है [सासादन गुणस्थानमें मरकर एकेन्द्रियोंमे उत्पन्न होनेवाले जीवोंके अपर्याप्तक दशामें दूसरा गुणस्थान भी सम्भव है]। केवली भगवान्‌के संज्ञी और असंज्ञीका व्यवहार नहीं होता है। अनाहारक मार्गणामें पहला, दूसरा, चौथा और चौदहवाँ गुणस्थान होता है [समुद्घातकी अपेक्षा तेरहवाँ गुणस्थान भी होता है]। आहारक मार्गणामे आदिके तेरह

गुणस्थान जानना चाहिये। इस प्रकार मार्गणा स्थानोंमे गुणस्थानोंका निर्देश संक्षेपसे किया है। ध्यानस्थ मुनिको इसका चिन्तवन करना चाहिये। ऐसा चिन्तवन करने वाले योगीका चित्त विषयोसे हट जाता है और उससे दुःखदायक कर्मोंको अत्यधिक निर्जरा होती है॥ ३२-३८॥

अब आगे मार्गणाओमे सम्यग्दर्शनका वर्णन करते हैं—

इतोऽग्रे मार्गणामध्ये सम्यग्दर्शनमुच्यते।
श्वभ्रगत्यनुवादेन प्रथमायां क्षितौ भवेत्॥ ३९॥
पर्याप्तकेषु सम्यक्त्वभेदानां त्रितयं पुनः।
अपर्याप्तकेषु विज्ञेयमौपशमिकमन्तरा॥ ४०॥
आद्येतरासु पृथ्वीषु पर्याप्तानां भवेद्द्वयम्।
क्षायिकं तत्र नास्त्येवापर्याप्तेषु न किञ्चन॥ ४१॥
तिर्यग्गत्यनुवादेन तिरश्चां भोगभूमिषु।
पर्याप्तानां भवेद् भेदत्रयं भव्यत्व शालिनाम्॥ ४२॥
अपर्याप्तेषु विज्ञेयमौपशामिकमन्तरा।
कर्मभूमिजतिर्यक्षु क्षायिकेण विना भवेत्॥ ४३॥
द्वयं सम्यक्त्वभेदानां पर्याप्तत्वविशुम्भताम्।
अपर्याप्तेषु नास्त्ये सम्यग्दर्शनसौरभम्॥ ४४॥
पर्याप्तेषु मनुष्येषु त्रिविधा वर्तते सुदृक्।
अपर्याप्तेषु नास्त्येव मोहोपशमजा सुदृक्॥ ४५॥
पूर्णासुद्रव्यनारीषु क्षायिकी दृग् न वर्तते।
अपूर्णद्रव्यभामासु गन्धोऽपि न दृशो भवेत्॥ ४६॥
देवगत्यनुवादेन देवेषु द्विविधेष्वपि।
अपर्याप्तासु नास्त्येव सम्यग्दर्शनसौरभम्॥ ४७॥
वानादिदेवदेवीषु पर्याप्तासु भवेद्द्वयम्।
अपर्याप्तासु सम्यक्त्व-भेदो नास्त्येव कश्चन॥ ४८॥

अर्थ—यहाँसे आगे मार्गणाओमे सम्यग्दर्शन कहा जाता है अर्थात् किस-किस मार्गणामे कौन-कौन सम्यग्दर्शन होता है, यह कहते हैं। नरकगतिकी अपेक्षा प्रथम पृथिवोमे पर्याप्तक नारकियोके तीनो सम्यग्दर्शन होते हैं परन्तु अपर्याप्तक नारकियोके औपशमिक सम्यग्दर्शन नही होता है। तात्पर्य यह है कि प्रथम पृथिवो तक सम्यग्दृष्टि जा सकता है परन्तु औपशमिक सम्यग्दृष्टि मरकर देवगतिके सिवाय अन्य गतियोमें नही जाता, इसलिये यहाँ उसका अभाव बतलाया है।

द्वितीयादिक पृथिवियोमें पर्याप्तकोंके क्षायिकके बिना दो सम्यक्त्व हो सकते हैं परन्तु अपर्याप्तकोके एक भी सम्यग्दर्शन नही होता।

तिर्यंग्गतिकी अपेक्षा भोगभूमिमें पर्याप्तक भव्य तिर्यञ्चोके तीनो सम्यग्दर्शन होते हैं परन्तु अपर्याप्तकोंके औपशमिक सम्यक्त्व नही होता। कर्मभूमिज पर्याप्तक तिर्यञ्चोमे क्षायिकके बिना दो सम्यक्त्व होते है परन्तु अपर्याप्तकोके सम्यग्दर्शनकी सुगन्ध नही रहती। तात्पर्य यह है कि जिसने तिर्यगायुका बन्ध करनेके बाद सम्यक्त्व प्राप्त किया है ऐसा मनुष्य नियमसे भोगभूमिका ही तिर्यञ्च होता है, कर्मभूमिका नही। अत कर्मभूमिके अपर्याप्तक तिर्यञ्च सम्यक्त्वका अभाव रहता है। पर्याप्तक अवस्थामे औपशमिक और क्षायोपशमिक नवीन उत्पन्न हो सकते हैं, इसलिये उनका सद्भाव बताया है।

पर्याप्तक मनुष्योमे तीनो सम्यग्दर्शन होते हैं, परन्तु अपर्याप्तक मनुष्योके औपशमिक सम्यग्दर्शन नही होता है। पर्याप्तक द्रव्य-स्त्रियोके क्षायिक सम्यग्दर्शन नही होता, नवीन उत्पत्तिकी अपेक्षा शेष दो होते हैं परन्तु अपर्याप्तक स्त्रियोके सम्यग्दर्शनका लेश भी नही होता है उसका कारण है कि सम्यग्दृष्टि जीव द्रव्य-स्त्रियोमे उत्पन्न नही होता।

देवगतिकी अपेक्षा पर्याप्तक-अपर्याप्तक—दोनो प्रकारके भव्य देवोमे तीनो सम्यग्दर्शन होते है। इसका कारण है कि द्वितीयोपशममे मरा जीव वैमानिक देवोमे उत्पन्न होता है। अतः अपर्याप्तक अवस्थामे भी औपशमिकका सद्भाव सम्भव है। पर्याप्तक देवियोमे क्षायिक सम्यग्दर्शन नही होता, नवीन उत्पत्तिकी अपेक्षा शेष दो सम्भव हैं। अपर्याप्तक देवियोके सम्यग्दर्शनकी गन्ध नही है। भवनत्रिक सम्बन्धी पर्याप्तक देव-देवियोके नवीन उत्पत्तिकी अपेक्षा औपशमिक और क्षायोपशमिक ये दो सम्यग्दर्शन होते हैं, अपर्याप्तकोके सम्यग्दर्शनका कोई भेद नही होता क्योकि सम्यग्दृष्टिकी उनमे उत्पत्ति नही होती॥ ३६-४८॥

आगे इन्द्रिय, काय, योग, वेद और ज्ञानमार्गणाकी अपेक्षा सम्यग्दर्शनका वर्णन करते हैं—

एकेन्द्रियात्समारभ्या संज्ञिपञ्चाक्षदेहिषु।
नास्त्येकमपि सम्यक्त्वं दौर्गत्येन युतेषु वै॥ ४९॥
पञ्चेन्द्रियेषु जायेत सम्यक्त्वत्रितयं पुनः।
स्थावरेषु च सम्यक्त्वं विद्यते नात्र किञ्चन॥ ५०॥
त्रसेषु त्रिविधं ज्ञेय सम्यक्त्वं पुण्यशालिषु।
योगत्रयेण युक्तेषु सम्यक्त्वत्रितय भवेत्॥ ५१॥

अयोगेषु भवेदेकं क्षायिकं नेतरत्तु तत्।
एकद्वियोग युक्तेषु सम्यक्त्वं नास्ति किञ्चन ॥ ५२ ॥
वेदत्रयेण युक्तेषु जायते त्रिविधं तु तत्।
भावतो, न तु द्रव्यस्त्री क्षायिकं लभते क्वचित् ॥ ५३ ॥
गतवेदेषु जायेत द्वितयं वेदकं विना।
क्षीणमोहादिषु ज्ञेयं केवलं क्षायिक तु तत् ॥ ५४ ॥
क्षायोपशमिकज्ञानचतुष्केण विशोभिषु।
त्रयः सम्यक्त्वभेदाः स्युः, क्षायिकज्ञानशालिषु ॥ ५५ ॥
केवलिषु भवेदेकं क्षायिकं नेतरत्पुनः।
मनःपर्ययुक्तेषु शमजं नैव जायते ॥ ५६ ॥

अर्थ—इन्द्रियानुवादकी अपेक्षा खोटो गतिसे युक्त, एकेन्द्रियसे लेकर असज्ञो पञ्चेन्द्रिय तकके जोवोके एक भी सम्यग्दर्शन नही होता। पञ्चेन्द्रिय जीवोमे तीनो सम्यक्त्व होते है। कायमार्गणाकी अपेक्षा स्थावरोमे कोई भो सम्यग्दर्शन नही होता परन्तु पुण्यशाली त्रसोमे तीनो प्रकारका सम्यक्त्व होता है। योगमार्गणाकी अपेक्षा तीनो योगोसे युक्त जीवोमे तीनो सम्यग्दर्शन होते हैं, अयोगियोके एक क्षायिक ही होता है अन्य दो नही होते। एक योग वाले—स्थावरोके और दो योग वाले—द्वीन्द्रियसे लेकर असज्ञो पञ्चेन्द्रिय तकके जोवोको कोई भो सम्यक्त्व नही होता। वेदमार्गणाकी अपेक्षा तीनो भाव वेदोसे युक्त जोवोके तीनो सम्यग्दर्शन होते हैं परन्तु द्रव्य-स्त्री कही भी क्षायिक सम्यक्त्वको प्राप्त नही होती। अपगत वेदो जीवोके क्षायोपशमिक को छोडकर औपशमिक और क्षायिक, ये दो सम्यग्दर्शन होते हैं परन्तु अपगत वेदियोमे जो क्षीणमोहादि गुणस्थानवर्ती हैं उनको एक क्षायिक हो जानना चाहिये। ज्ञानमार्गणाकी अपेक्षा चार क्षायोपशमिक ज्ञानोसे सहित जोवोके सम्यक्त्वके तीनो भेद होते हैं परन्तु क्षायिक ज्ञानसे सुशोभित केवलियोके एक क्षायिक सम्यक्त्व हो होता है शेष दो नही। क्षायोपशमिक ज्ञानो मे मनःपर्ययज्ञानसे युक्त जीवोके औपशमिक सम्यग्दर्शन नही होता ॥ ४९-५६ ॥

आगे सयम, दर्शन, लेश्या, भव्यत्व, सम्यक्त्व, संज्ञो और आहार-मार्गणाको अपेक्षा सम्यग्दर्शनका कथन करते हैं—

सामायिके तथा छेदोपस्थापन विशोभिते।
त्रयः सम्यक्त्वभेदाः स्युरारम पौरुषशालिनाम् ॥ ५७ ॥

परिहारविशुद्धयाह्वये शमजं नास्ति सर्वथा।
सूक्ष्मादि साम्पराये तु वेदकं नैव विद्यते ॥ ५८ ॥
यथाख्याते तु विज्ञेयं क्षायिक शमजं तथा।
केवलदर्शनाह्वयेषु केवल क्षायिकं भवेत् ॥ ५९ ॥
अन्यदर्शन युक्तेषु त्रिविधमपि सम्भवेत्।
सलेश्यानां त्रयो भेदा अलेश्यानां तु क्षायिकम् ॥ ६० ॥
त्रिविध जायते भव्ये त्वभव्ये नास्ति किञ्चन।
सम्यक्त्वानुवादेन वर्तते यत्र या भिदा ॥ ६१ ॥
तत्रैव सा परिज्ञेया सिद्धान्तानुगमोद्यतैः।
सम्यक्त्वस्य त्रयो भेदाः संज्ञिनां देहधारिणाम् ॥ ६२ ॥
जायन्तेऽसंज्ञिनां किन्तु ह्येकं नापि प्रजायते।
आहारकेऽप्यनाहारे त्रयो भेदा भवन्ति हि ॥ ६३ ॥
शमजं किन्त्वनाहारे निर्जरगत्यपेक्षया।
शमजेन युतो मृत्वा देवेष्वेवोपजायते ॥ ६४ ॥

अर्थ—संयममार्गणाकी अपेक्षा सामायिक और छेदोपस्थापना सयमसे सहित आत्मपुरुषार्थी जीवोके सम्यक्त्वके तीनो भेद होते हैं परन्तु परिहारविशुद्धि वालेके औपशमिक सम्यग्दर्शन नही होता। सूक्ष्मसाम्पराय संयममे वेदक सम्यग्दर्शन नही होता। यथाख्यातसंयम मे क्षायिक और औपशमिकसम्यग्दर्शन जानना चाहिये। दर्शनमार्गणा की अपेक्षा केवल दर्शनसे युक्त मनुष्योके मात्र क्षायिकसम्यक्त्व होता है शेष तीन दर्शनोसे सहित जीवोके तीनो सम्यग्दर्शन होते हैं। लेश्या-मार्गणा की अपेक्षा सलेश्यजीवोके तीनो भेद होते हैं, परन्तु अलेश्य—लेश्या रहित जीवोके मात्र क्षायिकसम्यक्त्व होता है। भव्यत्वमार्गणा की अपेक्षा भव्यजीवके तीनो सम्यक्त्व होते हैं पर अभव्य के एक भी नही होता। सम्यक्त्वमार्गणाकी अपेक्षा जहां जो भेद है सिद्धान्त-शास्त्रके जाननेमे उद्यत मनुष्योको वहाँ वही भेद जानना चाहिये। संज्ञी मार्गणाकी अपेक्षा संज्ञी जीवके तीनो सम्यग्दर्शन होते हैं किन्तु असंज्ञीजीवके एक भी सम्यग्दर्शन नही होता। आहारकमार्गणाकी अपेक्षा आहारक और अनाहारक—दोनो प्रकारके जीवोके सम्यग्दर्शनके तीनो भेद होते हैं परन्तु अनाहारक अवस्थामे औपशमिकसम्यग्दर्शन देवगति की अपेक्षा ही जानना चाहिये क्योंकि औपशमिकसम्यग्दर्शन के साथ मरा जीव देवोमे ही उत्पन्न होता है ॥ ५७-६४ ॥

आगे इस प्रकरणका समारोप करते हैं—

एवं सर्वं चिन्तयन्तः पुमांस-
श्चिन्ताकाले स्वीयचित्तं समन्तात् ।
पञ्चाक्षाणां दीर्घदुःखप्रदानां
द्वन्द्वाद् दूरीकृत्य सुस्था भवन्ति ॥ ६५ ॥

अर्थ—इस प्रकार इस सबका चिन्तन करने वाले पुरुष चिन्तनके कालमे अपने मन को अत्यधिक दु ख देनेवाले पञ्चेन्द्रियोके द्वन्द्व—इष्टानिष्ट विकल्प को दूरकर सुखी होते है ॥ ६५ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे ध्यान सामग्रीका
वर्णन करने वाला नवम प्रकाश पूर्ण हुआ ।

दशमप्रकाशः

आर्यिकाणां विधिनिर्देशः

मगलाचरणम्

नाहं क्लीबो नैव भामा पुमांश्च
नाहं गौरो नैव कृष्णो न पीतः ।
एते सर्वे सन्ति देहप्रपञ्चा-
स्तेभ्यो भिन्नः शुद्धचिन्मात्रमात्मा ॥ १ ॥
एवं ध्यात्वा ये स्वरूपे निलीना
रागद्वेषाद् ये विरक्ताश्च जाताः ।
तान् निर्ग्रन्थान् मोहमायाध्यतीतान्
भूयोभूयो भूरिशः संनमामि ॥ २ ॥

अर्थ—मैं नपुसक नही हूँ, मैं स्त्री नही हूँ, मैं पुरुष नही हूँ, मैं गोरा नही हूँ, मैं काला नही हूँ और मैं पोला नही हूँ। ये सब शरीर के प्रपञ्च हैं। आत्मा इन सबसे भिन्न शुद्ध चैतन्य मात्र है। ऐसा ध्यान कर जो स्वरूप मे लीन हैं और जो राग-द्वेषसे विरक्त हो चुके हैं, मोह मायासे रहित उन निर्ग्रन्थ मुनियो को मैं बार-बार अत्यधिक नमस्कार करता हूँ ॥ १-२ ॥

आगे आर्यिकाओंकी विधिका वर्णन करते हैं—

अथार्याणां विधिं वक्ष्ये भामानां हितसिद्धये।
यथागम यथाबुद्धि प्रणिपत्य मुनीश्वरान् ॥ ३ ॥
जीवाः सम्यक्त्वसंपन्ना मृत्वा नार्यो भवन्ति नो।
तथापि ताः स्वय शुद्धया लभन्ते सुदृशं पराम् ॥ ४ ॥
सीता सुलोचना राजी मत्याद्या बहवः स्त्रियः।
विधृत्यार्याव्रत नून प्रसिद्धा सन्ति भूतले ॥ ५ ॥

अर्थ—अब स्त्रियोके हितको सिद्धिके लिये मुनिराजो को नमस्कार कर मैं आगम और अपनी बुद्धिके अनुसार आर्यिकाओकी विधि कहूंगा। यद्यपि सम्यग्दृष्टि जीव मरकर स्त्रियो मे उत्पन्न नही होते अर्थात् स्त्री पर्याय प्राप्त नही करते तथापि भावशुद्धिसे वे स्त्रियाँ स्वय उत्कृष्ट, औपशमिक अथवा क्षायोपशमिक सम्यग्दर्शन प्राप्त कर लेती है। सीता, सुलोचना और राजीमती आदि बहुत स्त्रियाँ आर्यिकाके व्रत धारणकर निश्चित हो भूतल पर प्रसिद्ध हुई है ॥ ३-५ ॥

अब आगे कुछ निकट भव्यस्त्रिया श्री गुरुके पास जाकर आर्यिका-दीक्षाकी प्रार्थना करती है—

काश्चन क्षीण ससारा विरक्ता गृहभारतः।
विरज्य भवभोगेभ्यो गुरु पादान् समाश्रिताः ॥ ६ ॥
निवेदयन्ति तान् भक्त्या भीताः स्मो भवसागरात्।
हस्तावलम्बन दत्त्वा भगवंस्तारय द्रुतम् ॥ ७ ॥
न सन्ति केचनास्माकं न वयं नाथ कस्यचित्।
इमे संसारसम्भोगा भान्ति नो नागसन्निभाः ॥ ८ ॥
एषो विष प्रभावेण चिरात् सम्मूर्च्छिता वयम्।
अद्यावधि न विज्ञातं स्वरूपं हा निजात्मनः ॥ ९ ॥
ज्ञातादृष्टस्वभावाः स्मो देहाद् भिन्नस्वरूपकाः।
एतद् विस्मृत्य सर्वेषु भ्रान्ताः स्वत्वधिया चिरात् ॥ १० ॥
पुण्योदयात्पर ज्योति. सम्यक्त्वं मार्गदर्शकम्।
अस्माभिर्लब्धमस्त्यत्र पश्यामस्तेन शाश्वतम् ॥ ११ ॥
आत्मानं सुखसम्पन्न ज्ञानदर्शनसयुतम्।
एतल्लब्ध्वा वयं तृप्ताः सततं स्वात्मसम्पदि ॥ १२ ॥
अतो विरज्य भोगेभ्यो भवदन्तिकमागताः।
प्रार्थयामो वय भूयो भूयो दीक्षा प्रदेहि नः ॥ १३ ॥

बाष्पावरुद्धकण्ठास्ता रोमाञ्चितकलेवराः ।
शुश्रूषवो गुरोर्वाक्य तूष्णीभूताः पुरः स्थिताः ॥ १४ ॥

अर्थ—जिनका संसार क्षीण हो गया है तथा जो गृहभारसे विरक्त हो चुकी है ऐसी कुछ स्त्रिया संसार सम्बन्धी भोगो से विरक्त हो गुरु चरणोके पास जाकर उनसे भक्तिपूर्वक निवेदन करती हैं—हे भगवन् ! हम संसार सागरसे भयभीत है अत हस्तावलम्बन देकर शीघ्र ही तारो-पार करो। हमारे कोई नही है और हम भी किसीके कोई नही है। ये ससारके भोग हमे नागके समान प्रतिभासित होते हैं। इनके विष प्रयोगसे हम चिरकालसे मूच्छित हो रही हैं। खेद है कि हमने आज तक अपनी आत्माका स्वरूप नही जाना। हम शरीरसे भिन्न ज्ञाता, द्रष्टा स्वभाव वाली है। यह भूलकर हम सब पदार्थोंमे आत्मबुद्धि होनेके कारण चिरकालसे भटकती आ रही हैं। पुण्योदयसे हमने मार्गदर्शक सम्यक्त्वरूपी उत्कृष्ट ज्योति को प्राप्त कर लिया है। उस ज्योतिसे हम नित्य, सुख सपन्न तथा ज्ञानदर्शनसे सहित आत्मा को देख रही है—उसका अनुभव कर रही हैं। इस सम्यक्त्व की प्राप्तिसे हम निरन्तर अपनी आत्मसम्पदामे संतुष्ट रहती हैं। अतः भोगोसे विरक्त होकर आपके पास आई हैं तथा बार-बार प्रार्थना करती है कि हमे आर्यिकाकी दीक्षा दीजिये। यह कहते कहते जिनके कण्ठ वाष्पसे अवरुद्ध हो गये थे तथा शरीर रोमाञ्चित हो उठा था, ऐसी वे स्त्रिया गुरु वचन सुनने की इच्छा रखती हुई उनके सामने चुपचाप बैठ गई ॥ ९-१४ ॥

आगे गुरुने क्या कहा, यह लिखते हैं—

तासा मुखाकृति दृष्ट्वा परीक्ष्य भव्यभावनाम् ।
गुरुराह परप्रीत्या श्रेयोऽस्तु भवदात्मनाम् ॥ १५ ॥
आर्यादीक्षां गृहीत्वा भो निर्वृता भवतद्रुतम् ।
ससाराब्धिरय सत्य दुःखदो देहधारिणाम् ॥ १६ ॥
विरला एव सन्तीर्णा भवन्त्यस्मात् स्वपौरुषात् ।
सत्य क्षीणभवा भूय विरक्तास्तेन भोगतः ॥ १७ ॥

अर्थ—उनकी मुखाकृति देख तथा भव्य भावना की परीक्षा कर श्री गुरु बडी प्रीतिसे बोले—आप सबकी आत्माका कल्याण हो। आप लोग आर्यिकाकी दीक्षा लेकर शीघ्र ही संतुष्ट होवे। सचमुच ही यह संसार सागर प्राणियो को दुःख देने वाला है। बिरले ही जीव अपने

पुरुषार्थसे इस संसार सागरसे पार होते हैं। यथार्थमे आपका संसार क्षीण हो गया है इसीलिये भोगोसे विरक्ति हुई है ॥ १५-१७ ॥

आगे श्री गुरु उन्हे आर्यिकाके व्रत का उपदेश देते है—

महाव्रतानि सन्धत्त समितीनां च पञ्चकम् ।
पञ्चेन्द्रियजय कार्यः षडावश्यकपालनम् ॥ १८ ॥
विधिना नित्यशः कार्यं न कुर्याद् दन्तधावनम् ।
एकवारं दिवाभोज्यमुपविश्य सुखासनात् ॥ १९ ॥
हस्तयोरेवभोक्तव्यं न तु धात्वाविभाजने ।
शुभ्रैकाशाटिका धार्या मिताषोडशहस्तकैः ॥ २० ॥
भूमिशय्या विधातव्या रजन्याश्चोर्ध्वभागके ।
कचानां लुञ्चन कार्यं स्वहस्ताभ्यां नियोगतः ॥ २१ ॥
मासद्वयेन मासैस्तु त्रिभिर्मासचतुष्टयात् ।
गणिन्या सहकर्त्तव्यो निवासो रक्षितस्थले ॥ २२ ॥
चर्यार्थं सहगन्तव्य नगरे निगमे तथा ।
अन्याभिः सह साध्वीभिः श्रावकाणां गृहेषु वै ॥ २३ ॥
एकाकिन्या विहारो न कर्तव्यो जातुचित् क्वचित् ।
आचार्याणा समीपेऽपि न गच्छेदेकमात्रका ॥ २४ ॥
गणिन्या सार्धमन्याभिर्द्वित्राभिर्वा सह व्रजेत् ।
सप्तहस्तान्तरे स्थित्वा विनयेनोपविश्य वा ॥ २५ ॥
प्रश्नोत्तराणि कार्याणि सार्धमन्यतपस्विभिः ।
गृहिणोजनसम्पर्को न कार्यो विकथाकृते ॥ २६ ॥
जिनवाणीसमभ्यासे कार्यः कालस्य निर्गम ।
काले सामायिकं कार्यं स्वाध्यायः समये तथा ॥ २७ ॥
पादयात्रैव कर्तव्या न जातु वाहनाश्रय. ।
अग्नेः सन्तापन शीते न चौष्ण्ये जलसेचनम् ॥ २८ ॥
कार्यं विहार काले च पादत्राणं न धारयेत् ।
इत्यमार्याव्रतं प्रोक्तं भवतीनां पुरो मया ॥ २९ ॥

अर्थ—महाव्रत धारण करो, पाच समितियों का पालन करो, पञ्चेन्द्रियविजय करो, पदके अनुरूप नित्य ही विधिपूर्वक षडावश्यकका पालन करो, दन्त धावन न करो, दिनमे एक बार सुखासन—पालथीसे बैठकर हाथोमे भोजन करो, धातु आदिके पात्रोमे भोजन नही करो, सोलह हाथ की एक सफेद शाटी धारण करो, रात्रिके उत्तरार्धमे

जमोन पर शयन करो। दो माह, तीन माह अथवा चार माहमें नियमसे अपने हाथोसे केश लोच करो। तुम्हे गणिनोके साथ सुरक्षित स्थानमे निवास करना चाहिये। चर्या-आहारके लिये नगर अथवा ग्राममे अन्य आर्यिकाओके साथ श्रावकोके घर जाना चाहिये। कभो भी और कही भी अकेलो विहार नही करना चाहिये, आचार्योंके पास भो अकेलो नहो जाना चाहिये। गणिनो या अन्य दो तीन आर्यिकाओके साथ जाना चाहिये। विनयसे सात हाथ दूर बैठकर अन्य साधुओके साथ प्रश्नोत्तर करना चाहिये। विकथा करनेके लिये गृहस्थ स्त्रियोका सपर्क नही करना चाहिये। जिन वाणोके अभ्यासमे समय व्यतीत करना चाहिये। समय पर सामायिक और समय पर स्वाध्याय करना चाहिये। विहार के समय पैदल यात्रा हो करना चाहिये। सवारोका आश्रय कभो नही करना चाहिये। शोतकालमे अग्नि का तापना और ग्रोष्मकालमे पानोका सोचना नहो करना चाहिये और चलते समय पादत्राण नही रखना चाहिये। आप लोगोके सामने मैने यह आर्यिकाके व्रतका वर्णन किया है ॥ १८-२९ ॥

आगे क्षुल्लिकाके व्रतका वर्णन करते है—

एतस्य धारणे शक्तिर्नचेद् वो वर्तते क्वचित्।
शाटिकोपरि सन्धार्य एकोत्तरपटस्तत ॥ ३० ॥
आर्यिकाणा व्रतं नूनं तुल्यमस्ति महाव्रतैः।
अतस्ताः योग्यमानेन प्रतिग्राह्याः सुदातृभि ॥ ३१ ॥
क्षुल्लिकाणा व्रत किन्तूत्तमश्रावकसन्निभम्।
गुणस्थान तु विज्ञेयं पञ्चम द्विकयोरपि ॥ ३२ ॥

अर्थ—इस आर्यिका व्रतके धारण करनेमे यदि कही तुम्हारो शक्ति नही हो तो धोतोके ऊपर एक चादर धारण किया जा सकता है। सचमुच आर्यिकाका व्रत महाव्रतोके तुल्य है अर्थात् उपचारसे महाव्रत कहा जाता है। अत दान-दाताओ को उन्हे उनके पदके योग्य सन्मानसे पडिगाहना चाहिये। क्षुल्लिकाओका व्रत उत्तम श्रावक—ग्यारहवी प्रतिमाके धारकके समान है। आर्यिका और क्षुल्लिका दोनोके पञ्चम गुणस्थान जानना चाहिये ॥ ३०-३२ ॥

आगे श्री गुरुकी वाणी सुनकर उन स्त्रियोने क्या किया, यह कहते हैं—

इत्थमाचार्य वक्त्रेन्दु नि स्मृता वचनावलीम्।
सुधाधारायमाणा तां पीत्वाह्लाप्यायितादिचरम् ॥ ३३ ॥

गृहीत्वार्याव्रतं सद्यो जाताः शान्तिसुमूर्तयः।
शुभ्रैकवसनाः साध्व्यो मुखविभ्रमवर्जिता ॥ ३४ ॥
वात्सल्यमूर्तयः सन्ति सत्त्व रक्षणतत्पराः।
सीताद्या राजमत्याद्याश्चन्दनाद्याश्च साध्विकाः ॥ ३५ ॥
विहरन्तु चिरं लोके कुर्वाणा धर्मदेशनाम्।
आत्मश्रेयः पथं नृणां दर्शयन्त्यः सनातनम् ॥ ३६ ॥

अर्थ—इस प्रकार आचार्य महाराजके मुखचन्द्रसे निकली, अमृत धाराके समान आचरण करने वाली वचनावलीको पीकर—श्रवण कर वे सब स्त्रिया चिरकालके लिये सतुष्ट हो गई। वे सब आर्यिकके व्रत ग्रहण कर शान्ति की मूर्तिया बन गई। जो सफेद रगकी एक साडी धारण करती हैं, मुखके विभ्रम-हावभाव आदिसे रहित हैं, वात्सल्यकी प्रतिकृति स्वरूप हैं और जीवरक्षामे तत्पर रहती हैं ऐसी सीता आदि, राजी मती आदि और चन्दना आदि आर्यिकाएँ धर्म-देशना करतीं तथा मनुष्योंके लिये आत्म-कल्याण का सनातन मार्ग दिखलाती हुई लोकमे चिरकाल तक विहार करे ॥ ३३-३६ ॥

विशेष—आर्यिकाओका विशद वर्णन मूलाचारमे दिया गया है वहाँ बताया गया है कि आर्यिकाओको वयस्क, जितेन्द्रिय तथा भव-भ्रमण भीरु आचार्यको ही गुरु बनाना चाहिये तथा उनकी आज्ञानुसार वयस्क, वृद्ध आर्यिकाओको साथमे रहना चाहिये। अकेली विहार नही करना चाहिये।

आगे इस प्रकरण का समारोप करते हैं—

याभिस्त्यक्ता मोहनिद्रा विशाला
याभ्योजाता नेमिपार्श्वादयस्ता।
देवीतुल्यास्तीर्थकृन्मातृतुल्याः
साध्व्यो मे स्युर्मोक्षमार्गप्रणेत्र्यः ॥ ३७ ॥

अर्थ—जिन्होने मोहरूपी विशाल निद्राका त्याग किया है, जिनसे नेमिनाथ तथा पार्श्वनाथ आदि महापुरुष उत्पन्न हुए हैं, जो देवीके समान तथा तीर्थङ्करोकी माताओके समान है वे साध्वी—आर्यिकाएँ मेरे लिए मोक्षमार्ग पर ले जाने वाली हो ॥ ३७ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे आर्यिका व्रतका वर्णन करनेवाला दशम प्रकाश पूर्ण हुआ।

एकादशप्रकाशः

सल्लेखनाधिकार

मङ्गलाचरणम्

सल्लेखनां स्वात्महिताय धृत्वा
मुनीन्द्रमार्गाद् विचला न जाता.।
मुनीश्वरास्तेऽद्य सुकोशलाद्या
दिशन्तु मां स्वात्महितस्य मार्गम् ॥ १ ॥

अर्थ—जो स्वकीय आत्माके हितके लिये सल्लेखना धारणकर मुनिराजके मार्गसे विचलित नही हुए, वे सुकोशल आदि मुनिराज मुझे आत्म-कल्याण का मार्ग बतावे ॥ १ ॥

आगे सल्लेखना की उपयोगिता बताते है—

यथा कश्चिद् विदेशस्थो [1]नार्जयन् विपुलं धनम् ।
आयियासुः स्वकं देशं विदेशस्य नियोगत. ॥ २ ॥
तद्धनं सार्धमानेतुं समर्थो नैव जायते ।
तदा संक्लिष्टचेता सन् हृदये बहु खिद्यते ॥ ३ ॥
तथाय मनुजः स्वस्य प्रयत्नात् सञ्चितार्थकः ।
प्रयियासुः पर लोकमेतल्लोकनियोगतः ॥ ४ ॥
तद्धनं सह सन्नेतुमसमर्थो यदा भवेत् ।
तदा दु.खेन सन्तप्तो विरौति किं करोम्यहम् ॥ ५ ॥
अनुभूय महाकष्टं वित्तमेतदुपार्जितम् ।
सार्धं नेतुं न शक्नोमि प्रयासो मम निष्फलः ॥ ६ ॥
विलपन्त नरं दृष्ट्वा करुणाक्रान्तमानसः ।
विदेशस्याधिपः कश्चित् तस्मै ददाति पत्रकम् ॥ ७ ॥
एतत्पत्र गृहीत्वा त्वं प्रयाहि स्वीयपत्तनम् ।
एतद्वित्त त्वया तत्रावश्यं प्राप्तं भविष्यति ॥ ८ ॥
एवं दयालुराचार्य परलोकं यियासवे ।
सल्लेखनाह्वयं पत्रं दत्वा वदति भूरिशः ॥ ९ ॥
एतत्पत्र प्रभावेण त्वमेतन्निखिलं धनम् ।
परलोके नियोगेन प्राप्स्यस्येव न सशय. ॥ १० ॥
तात्पर्यमिदमेवात्र ह्येतल्लोकस्य वैभवम् ।
परलोके निनीषुश्चेत् कुरु सल्लेखनां ततः ॥ ११ ॥

---

१ ना पुरुष. ।

अर्थ—जिस प्रकार कोई विदेशमे रहने वाला मनुष्य विपुल धन अर्जित करता है परन्तु जब स्वदेशको आनेकी इच्छा करता है तो उस देशके नियमानुसार वह उस धन को साथ लानेमे समर्थ नहीं हो पाता। इस दशामे वह सक्लिष्ट चित्त होता हुआ बहुत दुःखी होता है। इसी प्रकार यह पुरुष अपने प्रयत्नसे बहुत धनका संचय करता है परन्तु जब वह परलोकको जाना चाहता है तब इस लोकके नियमानुसार उस धनको साथ ले जानेमे समर्थ नही हो पाता. इस स्थितिमे वह दु खसे सतप्त होता हुआ रोता है, क्या करूं ? महान् कष्ट सहकर मैंने यह धन उपार्जित किया है परन्तु साथ ले जानेमे समर्थ नही हूँ, मेरा परिश्रम व्यर्थ गया। इस प्रकार विलाप करते हुए उस पुरुषको देखकर कोई दयालु विदेश का राजा उसके लिये एक पत्र देता है तथा कहता है कि तुम इस पत्र को लेकर अपने नगर जाओ, यह धन तुम्हे वहाँ अवश्य ही मिल जायेगा। इसी प्रकार दयालु आचार्य परलोक को जाने के लिये इच्छुक पुरुष को सल्लेखना नामक पत्र देकर बार-बार कहते हैं कि तुम इस पत्रके प्रभावसे यह धन परलोकमे अवश्य ही प्राप्त कर लोगे, इसमे संशय नही है। तात्पर्य यही है कि यदि तुम इस लोक का वैभव परलोकमे ले जाना चाहते हो तो सल्लेखना करो ॥ २-११ ॥

आगे संन्यास सल्लेखना कबकी जाती है, यह कहते हुए उसके भेद बताते हैं—

उपसर्गेऽप्रतीकारे दुर्भिक्षे चापिभीषणे।
व्याधावापतिते घोरे संन्यासो हि विधीयते ॥ १२ ॥

संन्यासस्त्रिविधः प्रोक्तो जैनागमविशारदैः।
प्रथमो भक्तसंख्यानो द्वितीयश्चेङ्गिनीमृतिः ॥ १३ ॥

प्रायोपगमनं चान्त्यं कर्मनिर्जरणक्षमम्।
यत्र यमनियमाभ्यामाहारस्त्यज्यते क्रमात् ॥ १४ ॥

वैयावृत्यं शरीरस्य स्वस्य यत्र विधीयते।
स्वेन वा च परैर्वापि सेवाभावसमुद्यतैः ॥ १५ ॥

ज्ञेयः स भक्तसंख्यानः साध्यः सर्वजनैरिह।
जघन्यमध्यमोत्कृष्टभेदात् स त्रिविधो मत ॥ १६ ॥

जघन्य समयो ज्ञेयो घटिकाद्वय सम्मितः।
अन्त्यो द्वादश वर्षात्मा मध्यमोऽनेकधा स्मृत. ॥ १७ ॥

इङ्गिनीमरणे स्वस्य सेवा स्वेन विधीयते।
परेण कार्यते नैव वैराग्यस्य प्रकर्षतः ॥ १८ ॥
प्रायोपगमने सेवा नैव स्वस्य विधीयते।
स्वेन वा न परैश्चापि निर्मोहत्वस्य वृद्धितः ॥ १९ ॥
एते त्रिविधसंन्यासा. कर्तव्याः प्रीतिपूर्वकम्।
प्रीत्या विधीयमानास्ते जायन्ते फलदायकाः ॥ २० ॥

अर्थ—प्रतिकार रहित उपसर्ग, भयंकर-दुर्भिक्ष और घोर-भयानक बीमारीके होनेपर सन्यास किया जाता है। जैन सिद्धान्तके ज्ञाता पुरुषो द्वारा सन्यास तीन प्रकार का कहा गया है। पहला भक्तप्रत्याख्यान, दूसरा इङ्गिनीमरण और तीसरा कर्मनिर्जरामे समर्थ प्रायोपगमन। जिसमे यम और नियमपूर्वक क्रमसे आहारका त्याग किया जाता है तथा अपने शरीर की टहल स्वय की जाती है और सेवामे उद्यत रहने वाले अन्य लोगोसे भी करायी जाती है, उसे भक्त प्रत्याख्यान जानना चाहिये। यह संन्यास सब लोगोके द्वारा साध्य है। यह सन्यास जघन्य, मध्यम और उत्कृष्टके भेदसे तीन प्रकार का माना गया है। जघन्यका काल दो घडी अर्थात् एक मुहूर्त और उत्कृष्ट का बारह वर्ष जानना चाहिये। मध्यमका काल अनेक प्रकार है। इङ्गिनीमरणमे अपनी सेवा स्वयं की जाती है, वैराग्य की अधिकताके कारण दूसरोसे नही करायी जाती। प्रायोपगमनमे अपनी सेवा न स्वय की जाती है और न दूसरोसे करायी जाती है। ये तीनो संन्यास प्रीतिपूर्वक करना चाहिये। क्योकि प्रीतिपूर्वक किये जाने पर ही फलदायक होते है ॥ १२-२० ॥

आगे निर्यापकाचार्यके अन्तर्गत सल्लेखना करना चाहिये, यह कहते है—

सरिन्मध्ये यथा नौका कर्णधार विना क्वचित्।
न लक्ष्यं शक्यते गन्तु तथा निर्यापक विना ॥ २१ ॥
सल्लेखनासरिन्मध्ये सुस्थितः क्षपकस्तथा।
न गन्तु शक्यते लक्ष्यं कार्यो निर्यापकस्ततः ॥ २२ ॥
उपसर्गसहः साधुरायुर्वेदविशारदः।
देहस्थितिमवगन्तु क्षमः क्षान्ति युतो महान् ॥ २३ ॥
मिष्टवाक् सरलस्वान्तः कारितानेक सन्मृतिः।
निर्यापको विधातव्यः संन्यासग्रहणे पुरा ॥ २४ ॥

अर्थ—जिस प्रकार नदीके बीच खेवटियाके बिना नाव कही अपने लक्ष्य स्थानपर नही ले जायी जा सकती उसी प्रकार निर्यापकाचार्यके

विना सल्लेखना रूप नदीके बीच स्थित क्षपक अपने लक्ष्य स्थानपर नहीं पहुंच सकता। इसलिये निर्यापकाचार्य बनाना चाहिये। जो साधु उपसर्ग सहन करने वाला हो, आयुर्वेदका ज्ञाता हो, शरीर स्थितिके जाननेमे समर्थ हो, क्षमासहित हो, महान् प्रभावशाली हो, मिष्ट-भाषी हो, सरल चित्त हो तथा जिसने अनेक सन्यासमरण कराये हैं, ऐसे साधुको संन्यासग्रहणके समय निर्यापकाचार्य बनाना चाहिये। यह निर्यापकाचार्य का निर्णय संन्यासग्रहणके पूर्व कर लेना चाहिये ॥ २१-२४ ॥

आगे क्षपक निर्यापकाचार्यसे सल्लेखना कराने की प्रार्थना करता है—

भगवन् ! संन्यासदानेन मज्जन्मसफलीकुरु ।
इत्थं प्रार्थयते साधुर्निर्यापकमुनीश्वरम् ॥ २५ ॥
क्षपकस्य स्थितिं ज्ञात्वा दद्यान्निर्यापको मुनिः ।
स्वीकृतिं स्वस्य संन्यासविधि सम्पादनस्य वै ॥ २६ ॥
द्रव्यं क्षेत्रं च काल च भाव वा क्षपकस्य हि ।
विलोक्य कारयेत्तेन ह्युत्तमार्थं प्रतिक्रमम् ॥ २७ ॥
क्षपकः सकलान् दोषान् निर्व्याजं समुदीरयेत् ।
क्षमयेत् सर्वसाधून् स स्वयं कुर्यात्क्षमां च तान् ॥ २८ ॥
एवं निःशल्यकोभूत्वा कुर्यात्संस्तरोहणम् ।
निर्यापकश्च विज्ञाय क्षपकस्य तनूस्थितिम् ॥ २९ ॥
अन्नपानादि सत्यागं कारयेतु यथाक्रमम् ।
पूर्वमन्नस्य संत्याग नियमेन यमेन वा ॥ ३० ॥
पेयस्यापि ततस्त्यागं कारयति यथाविधि ।
क्षपकस्य महोत्साहं वर्धयेदनिशं सुधीः ॥ ३१ ॥

अर्थ—'हे भगवन् ! संन्यास देकर मेरा जन्म सफल करो', इस प्रकार साधु निर्यापक मुनिराजसे प्रार्थना करता है। निर्यापक मुनि-क्षपक की स्थिति जानकर संन्यास-विधि करानेके लिये अपनी स्वीकृति देते हैं। निर्यापकाचार्य सबसे पहले द्रव्य, क्षेत्र, काल और भावको-देखकर क्षपकसे उत्तमार्थ प्रतिक्रमण कराते हैं। क्षपकको भी छल रहित अपने समस्त दोष प्रकट करना चाहिये। तत्पश्चात् क्षपक नि-शल्य होकर सब साधुओसे अपने अपराधोको क्षमा कराता है और स्वयं भी उन्हे क्षमा करता है। निर्यापकाचार्य क्षपककी शरीरस्थिति-को अच्छी तरह जानकर क्रमसे अन्न-पानका त्याग कराते हैं। पहले

यम या नियम रूपसे अन्नका त्याग कराते है पश्चात् क्रमसे पेयका भी त्याग कराते हैं। बुद्धिमान् निर्यापकाचार्य निरन्तर क्षपकका उत्साह बढ़ाते रहते हैं ॥ २५-३१ ॥

आगे निर्यापकाचार्य क्षपकको क्या उपदेश देते हैं, यह कहते हैं—

क्षुत्पिपासादिना जात कष्टं नानानिदर्शनैः।
दूरीकुर्यात् सदा साधुर्निर्यापणविधिक्षमः ॥ ३२ ॥
साधो ! न विद्यते कश्चित् पुद्गलो जगतीतले।
यो न भुक्तस्त्वया पूर्वं केय भुक्ते रतिस्तव ॥ ३३ ॥
नारके कियती बाधा विसोढा क्षुत्तृषोस्त्वया।
संस्मरनित्यमात्मानं ज्ञानानन्दस्वभावकम् ॥ ३४ ॥
आत्मा न म्रियते जातु पर्यायो ह्येवमुच्यते।
पर्यायस्य स्वभावोऽयं न हर्तुं शक्य एव ते ॥ ३५ ॥
विधिना कृत संन्यासो भव्य· सान्तभवार्णवः।
नियमान्निर्वृतिं याति पृथकत्वभव मध्यके ॥ ३६ ॥
बालबालोऽथवा बालो बालपण्डित एव च।
मृत्यवो बहवः प्राप्ता भ्रमता भवकानने ॥ ३७ ॥
पण्डितोऽद्यमृतिः प्राप्ता विधेह्येतां सुनिर्मलाम्।
पण्डिते मरणे प्राप्ते पण्डित पण्डित सम्मृतिः ॥ ३८ ॥
सुलभा ते भवेदेव साहस कुरु सत्वरम्।
निर्यापकवचः श्रुत्वा क्षपकः शुद्धचेतसा ॥ ३९ ॥
ध्यायन् पञ्च नमस्कार मन्त्रं प्राणान् विसर्जयेत्।
क्षपकस्त्रिदिव याति संन्यासस्य प्रभावतः ॥ ४० ॥
तत्र भुङ्क्ते चिरं भोगान् वन्दते च जिनालयान्।
मेरु नन्दीश्वरादीनां स्थायिनोऽकृत्रिमान् सदा ॥ ४१ ॥

अर्थ—निर्यापण विधि करानेमे समर्थ साधु निर्यापकाचार्य, क्षुधा· तृषा आदिसे उत्पन्न कष्टको अनेक दृष्टान्तोके द्वारा दूर करता रहे। हे साधो ! इस पृथिवीतलपर ऐसा कोई पुरुष नही है जिसे तूने पहले भोगा न हो। अत· भुक्त—भोगी हुई वस्तुमे तुम्हारा यह राग क्या है ? नरकपर्यायमे तूने क्षुधा तृषाकी कितनी बाधा सही है। तूं निरन्तर ज्ञानानन्द स्वभावी आत्माका स्मरण कर। आत्मा कभी नही मरती है, मात्र पर्याय ही छूटती है, पर्यायका यह स्वभाव तुम्हारे द्वारा हरा नही जा सकता। जिसका ससार सागर सान्त हो गया है, ऐसा भव्य

जीव यदि विधिपूर्वक संन्यास मरण करता है तो वह सात-आठ भवमें नियमसे निर्वाणको प्राप्त होता है। संसार वनमे भ्रमण करते हुए तूने बालबाल, बाल और बालपण्डितमरण बहुत किये है। आज पण्डित-मरण प्राप्त हुआ है सो इसे निर्मल-निर्दोष कर। पण्डितमरण प्राप्त होनेपर पण्डितपण्डितमरण सुलभ हो जावेगा, अतः शीघ्र हो साहस कर। निर्यापकाचार्यके वचन सुनकर क्षपक शुद्धचित्तसे पञ्चनमस्कार मन्त्रका ध्यान करता हुआ प्राण छोडता है। संन्यासमरणके प्रभावसे क्षपक स्वर्ग जाता है तथा वहाँ चिरकालतक भोग भोगता है। साथ ही मेरु—नन्दीश्वर आदिके शाश्वत अकृत्रिम चैत्यालयोकी वन्दना करता है ॥ ३३-४१ ॥

भावार्थ—संक्षेपमे मरणके पाँच भेद हैं—१ बालबाल, २ बाल, ३ बालपण्डित ४ पण्डित और ५. पण्डित-पण्डित। मिथ्यादृष्टिके मरणको बालबालमरण कहते हैं। अविरत सम्यग्दृष्टिके मरणको बाल-मरण कहते हैं। देशविरत-श्रावकके मरणको बालपण्डितमरण कहते हैं। मुनिके मरणको पण्डितमरण कहते हैं और केवलीके (मरण) निर्वाणको पण्डितपण्डितमरण कहते है।

आगे सल्लेखनाके प्रकरणका समारोप कहते हैं—

मनसि ते यदि नाकसुखस्पृहा
कुरु रुचिं जिनसंयमधारणे।
भज जिनेन्द्रपदं श्रयशारदां
जिन मुखाब्जभवां सुगुरून् नम ॥ ४२ ॥

अर्थ—यदि तेरे मनमे स्वर्ग सुखको चाह है तो जिनेन्द्र प्रतिपादित संयमके धारण करनेमे रुचि कर, जिनेन्द्रदेवके चरणोको आराधना कर, जिनेन्द्रके मुखकमलसे समुत्पन्न वाणीका आश्रय लें और सुगुरुओंको नमस्कार कर ॥ ४२ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमें संन्यास-सल्लेखनाका वर्णन करनेवाला एकादश प्रकाश समाप्त हुआ।

द्वादशप्रकाशः

देशचारित्राधिकार

मङ्गलाचरणम्

यज्ज्ञानमार्तण्डसहस्ररश्मि-
प्रकाशिताशेषदिगन्तराले।
न विद्यते किञ्चिदपि प्रकाश-
विवर्जितं वस्तु समस्तलोके ॥ १ ॥
यश्चात्र नित्यं गतरागरोषः
शुद्धाम्बराभः सततं विभाति।
स वीर नाथो मम बोधरम्य-
रश्मिप्रसारेऽवहित. सदा स्यात् ॥ २ ॥

अर्थ—जिनके ज्ञानरूपी सूर्यको हजारो किरणोके द्वारा समस्त दिशाओके अन्तराल-मध्यभाग प्रकाशित हो रहे है। ऐसे समस्त लोकमे कोई पदार्थ अप्रकाशित नही रहा था अर्थात् जो सर्वज्ञ थे और जो नित्य ही रागद्वेषसे रहित होनेसे शुद्ध आकाशके समान सदा सुशोभित थे ऐसे महावीर भगवान् मेरे ज्ञानको रमणीय किरणोके प्रसारमे सदा तत्पर रहे ॥ १-२ ॥

भावार्थ—सर्वज्ञ और वीतराग भगवान् महावीरका पुण्य स्मरण हमारी ज्ञानवृद्धिमे सहायक हो।

आगे देशचारित्रका वर्णन करते हैं—

अथाग्रे देशचारित्रं किञ्चिदत्र प्रवक्ष्यते।
हिताय हतशक्तीनां पूर्णचारित्रधारणे ॥ ३ ॥
देह ससार निर्विण्णः सम्यक्त्वेन विभूषितः।
कश्चिद् भव्यतमो जीवस्तीर्ण प्राय भवार्णवः ॥ ४ ॥
हिंसास्तेयानृताब्रह्म द्विविधग्रन्थराशितः।
देशतो विरलीभूत्वा देशचारित्रमश्नुते ॥ ५ ॥

अर्थ—अब आगे पूर्णचारित्र धारण करनेमे शक्तिहीन मनुष्योके हितके लिए कुछ देशचारित्र कहा जायगा। जो संसार और शरीरसे उदासीन है, सम्यग्दर्शनसे सुशोभित है तथा जिसने भव-सागरको प्राय: पार कर लिया है ऐसा कोई श्रेष्ठ भव्य जीव, हिंसा, असत्य,

चोरी, कुशील और द्विविध—चेतन-अचेतन परिग्रह राशिसे एकदेश विरक्त हो देशचारित्रको प्राप्त होता है ॥ ३-५ ॥

आगे पाँच अणुव्रतोंका स्वरूप निर्देश करते हैं—

अहिंसादिप्रभेदेनाणुव्रतं पञ्चधामतम् ।
निवृत्तिस्त्रसहिंसातोऽहिंसाणुव्रतमुच्यते ॥ ६ ॥
संकल्पाद् विहिता हिंसा भविनां भववर्धनी ।
एतत्प्रभावतो जीवा जायन्ते श्वभ्रभूमिषु ॥ ७ ॥
आरम्भाज्जायते हिंसा या च युद्धात्प्राजयते ।
उद्यमाद् या समुत्पन्ना तासां त्यागो न वर्तते ॥ ८ ॥
यथायथोर्ध्वमायान्ति प्रतिमादिविधानतः ।
तथा तथा परित्याग आसां हि सम्भवेन्नृणाम् ॥ ९ ॥
स्थूलानृतवचनानां त्यागो यत्र विधीयते ।
सत्याणुव्रतमेतत्स्यात्पुंसां सद्धर्मशालिनाम् ॥ १० ॥
स्थूलस्तेयाख्य पापाद् या विरति पुण्यशोभिनाम् ।
अचौर्याणुव्रतं ज्ञेय तदेतत्सौख्यकारणम् ॥ ११ ॥
धर्मेण परिणीतायाः पत्न्या सम्बन्धमन्तरा ।
अन्यस्त्रीसङ्ग सन्त्यागो ब्रह्मचर्यं भवेत्तु तत् ॥ १२ ॥
धनधान्यादिवस्तूनां चेतनाचेतनात्मताम् ।
यो देशेन परित्यागः सोऽपरिग्रहसंज्ञकम् ॥ १३ ॥
अणुव्रत परिज्ञेयं जनसौजन्यकारणम् ।
वस्तुतो वर्धमानेच्छा जनानां दुःखकारणम् ॥ १४ ॥

अर्थ—अहिंसा आदिके भेदसे अणुव्रत पाँच प्रकारका माना गया है। त्रसहिंसासे निवृत्ति होना अहिंसाणुव्रत कहलाता है। संकल्पासे की गई हिंसा ससारी जीवोके ससारको बढानेवाली है। इसके प्रभावसे जोव नरककी पृथिवियोमे उत्पन्न होते हैं। आरम्भसे, युद्धसे और उद्योग से जो हिंसाये होती है उनका प्रारम्भमे त्याग नही होता। प्रतिमा आदिके विधानसे मनुष्य जैसे-जैसे ऊपर आते जाते है वैसे-वैसे ही उनका त्याग सम्भव होता जाता है। स्थूल असत्य वचनोका जिसमे त्याग किया जाता है वह समीचीन धर्मसे सुशोभित पुरुषोका सत्याणुव्रत है। स्थूल चोरी नामक पापसे पुण्यशाली मनुष्योको जो निवृत्ति है उसे अचौर्याणुव्रत जानना चाहिए। यह सुखका कारण है। धर्मपूर्वक विवाही गई स्त्रीके सम्बन्धको छोड़कर अन्य स्त्रियोके समागमका

त्याग करना ब्रह्मचर्याणु व्रत है। चेतन-अचेतन धनधान्यादि वस्तुओंका जो एकदेश त्याग है उसे परिग्रह परिमाणाणुव्रत जानना चाहिए। यह व्रत मनुष्योके सौजन्यका कारण है। वास्तवमे बढती हुई इच्छा हो मनुष्योके दु खका कारण है॥ ६-१४॥

आगे तोन गुणव्रतोका वर्णन करते है—

अणुव्रतानां साहाय्यकरणं स्याद् गुणव्रतम्।
दिशाव्रतादिभेदेन तच्चेह त्रिविधं मतम्॥ १५॥
प्राच्यपाच्यादिकाष्ठासु यातायातनियन्त्रणम्।
यावज्जीवं भवेत्काष्ठा व्रतमाद्य गुणव्रतम्॥ १६॥
काष्ठाव्रतस्य मर्यादा मध्ये ह्यचिरकालकम्।
यो हि नाम भवेन्नाम तच्च देशव्रतं स्मृतम्॥ १७॥
मनो वाक्काय चेष्टा या सा हि दण्ड. समुच्यते।
अर्थो न विद्यते यस्य दण्डः सोऽनर्थको मतः॥ १८॥
त्यागश्चानर्थदण्डस्यानर्थदण्डव्रतं मतम्।
कृष्यादिपापकार्याणामुपदेशो निरर्थकः॥ १९॥
दीयते यः स पापोपदेशो ह्यनर्थदण्डकः।
तस्य त्यागो विधातव्यः पापास्रवनिरोधिभिः॥ २०॥
धनुर्बाणादि हिंसोपकरणाना निरर्थकम्।
हिंसादान प्रदानं स्यात्तत्यागस्तु व्रतं स्मृतम्॥ २१॥
रागद्वेषादिवृद्धिः स्याद् यासां श्रवणतो नृणाम्।
ता हि दुःश्रुतयो ज्ञेयास्तत्त्यागस्तु व्रतं मतम्॥ २२॥
अन्येषां वधबन्धादि चिन्तनं रागरोषतः।
अपध्यान भवेत् त्यागस्तस्य च स्यान्महद् व्रतम्॥ २३॥
शैलाराम समुद्रादौ यद् भ्रमणं निरर्थकम्।
मताप्रमादचर्या सा तत्त्यागो व्रतमुच्यते॥ २४॥

अर्थ—जो अणुव्रतोकी सहायता करता है वह गुणव्रत है। दिग्व्रत आदिके भेदसे वह गुणव्रत तोन प्रकारका माना गया है। पूर्व-पश्चिम आदि दिशाओमे जोवन पर्यन्तके लिये यातायातको नियन्त्रित करना दिग्व्रत नामका पहला गुणव्रत है। दिग्व्रतको मर्यादाके बोचमें कुछ समयके लिए जो नियम लिया जाता है वह देशव्रत माना गया है। मन, वचन, कायकी जो चेष्टा है वह दण्ड कहलाती है। जिसका कोई प्रयोजन नहीं है वह अनर्थ कहलाता है, अनर्थदण्डका त्याग करना अनर्थ-

दण्डव्रत है। कृषि आदि कार्योंका जो निरर्थक-निष्प्रयोजन उपदेश दिया जाता है वह **पापोपदेश** नामका अनर्थदण्ड है। पापास्रवका निरोध करनेवाले मनुष्योंको उसका त्याग करना चाहिए। धनुष, बाण आदि हिंसाके उपकरणोंका निरर्थक देना **हिंसादान** नामका अनर्थ दण्ड है, उसका त्याग करना व्रत है। जिनके सुननेसे मनुष्योंको राग-द्वेषकी वृद्धि होती है वह **दुःश्रुति** नामका अनर्थदण्ड है, इसका त्याग करना व्रत है। रागद्वेषसे अन्य लोगोंके वध-बन्धन आदिका चिन्तन करना **अपध्यान** अनर्थदण्ड है, उसका त्याग करना श्रेष्ठ व्रत है। पर्वत, उद्यान तथा समुद्र आदिमें निरर्थक भ्रमण करना **प्रमादचर्या** है उसका त्याग करना व्रत कहलाता है ॥ १५-२४ ॥

आगे चार शिक्षाव्रतोंका वर्णन करते हैं—

मुनिधर्मस्य शिक्षायाः प्राप्तिर्यस्मात्प्रजायते।
शिक्षाव्रतं तु तज्ज्ञेयं चतस्रः सन्ति तद्भिदा ॥ २५ ॥
आद्यं सामायिकं ज्ञेयं द्वितीयं प्रोषधाह्वयम्।
भोगोपभोगवस्तूनां परिमाणं तृतीयकम् ॥ २६ ॥
शिक्षाव्रतं चतुर्थं स्यादतिथिसंविभागकम्।
श्रावकैः पालनीयानि यथाकालं यथाविधि ॥ २७ ॥

अर्थ—जिससे मुनिधर्मकी शिक्षाकी प्राप्ति होती है उसे शिक्षाव्रत जानना चाहिये। इसके चार भेद हैं—पहला सामायिक, दूसरा प्रोषधोपवास, तीसरा भोगोपभोग परिमाण और चौथा अतिथि संविभाग। श्रावकोंको यथासमय विधि-पूर्वक इनका पालन करना चाहिये ॥ २५-२७ ॥

आगे इनका स्वरूप कहते हैं—

प्रातर्मध्याह्नसन्ध्यासु कृतिकर्मपुरस्सरम्।
सामायिकं सुकर्तव्यं घटिकाद्वयसम्मितम् ॥ २८ ॥
अष्टम्यां च चतुर्दश्यां चतुराहारवर्जनम्।
प्रोषधः स हि विज्ञेय एकासनपुरस्सरः ॥ २९ ॥
ये भुज्यन्ते सकृद् भोगाः कथ्यन्ते तेऽशनादयः।
भूयोभूयोऽपि भुज्यन्ते ये तेऽलंकरणादयः ॥ ३० ॥
उपभोगाः प्रकीर्त्यन्ते वस्तु तस्य विशारदैः।
परिमाणं सदा ह्येषां विधातव्यं विवेकिभिः ॥ ३१ ॥

सुपात्राय सदा देयं दानमत्र चतुर्विधम्।
सुपात्रं त्रिविधं प्रोक्तमुत्तमादि प्रभेदतः॥ ३२॥
रत्नत्रयेण संयुक्ता मुनयः शान्तमूर्तयः।
ज्ञेयान्युत्तमपात्राणि ह्यार्यिका मातरस्तथा॥ ३३॥
देशवृत्तयुता ज्ञेया ऐलकादिपदान्विताः।
सूक्तानि मध्यपात्राणि जैनतत्त्वविशारदैः॥ ३४॥
व्रतेन रहिताः सम्यग्दृष्टयो जिनभाक्तिकाः।
प्राप्ता जघन्य पात्रत्वं कथिताश्चरणागमे॥ ३५॥
एभ्यस्त्रिविध पात्रेभ्यो देय दान चतुर्विधम्।
आहारौषध शास्त्राद्यभयभेदाच्चतुर्विधम्॥ ३६॥
दान महर्षिभि· प्रोक्तं गृहिणां पुण्यकारणम्।
दानेनैव शुध्यन्ते गृहाणि गृहिणामिह॥ ३७॥
अन्ते सल्लेखना कार्या व्रतिभिर्विधिसयुता।
सल्लेखना विधिः पूर्वं प्रोक्तो विस्तरतो मया॥ ३८॥

अर्थ—प्रात, मध्याह्न और सायकाल कृतिकर्म—कायोत्सर्ग आवर्त आदि सहित कमसे कम दो घडीतक सामायिक करना चाहिये। अष्टमी और चतुर्दशीको चारो प्रकारके आहारका त्याग करना प्रोषधोपवास है। यह धारणा और पारणाके एकासनसे सहित होता है। जो एक बार भोगे जाते है वे भोजन आदि भोग है और जो बार-बार भोगे जाते हैं वे आभूषण आदि वस्तु स्वरूपके ज्ञाता पुरुषो द्वारा उपभोग कहे जाते हैं। विवेकी मनुष्योको इनका परिमाण करना चाहिये। यही भोगोपभोग परिमाणव्रत है। सुपात्रके लिये सदा चार प्रकारका दान देना चाहिये। उत्तम, मध्यम और जघन्यके भेदसे सुपात्र तीन प्रकारका कहा गया है। जो रत्नत्रयसे सहित तथा शान्तिकी मानो मूर्ति हैं ऐसे मुनि और आर्यिका माताएँ उत्तम पात्र जानने योग्य हैं। जो देशव्रतसे सहित हैं ऐसे ऐलक आदि पदसे सहित व्रती, जैनतत्त्वके ज्ञाता पुरुषोके द्वारा मध्यम पात्र कहे गये हैं और जो व्रतसे रहित हैं तथा जिनेन्द्रदेवके भक्तसम्यग्दृष्टि है वे चरणानुयोगमे जघन्य पात्र माने गये हैं। इन तीनो प्रकारके पात्रोके लिये चार प्रकारका दान देना चाहिये। महर्षियोने आहार, औषध, शास्त्रादि उपकरण और अभयके भेदसे दानके चार भेद कहे हैं। वास्तवमे गृहस्थोके घर दानमे ही शुद्ध होते हैं। अन्तमे व्रती मनुष्योको विधि-

पूर्वक सल्लेखना करनी चाहिये। सल्लेखनाकी विधि पीछे विस्तार-पूर्वक कही गई है ॥ २८-३८ ॥

आगे सत्तर अतिचारोंके कथनकी प्रतिज्ञाकर सम्यग्दर्शनके अतिचार कहते हैं—

इतोऽग्रे सम्प्रवक्ष्याम्यतीचाराणां च सप्ततिम्।
श्रुत्वा सुपरिहार्यास्ते व्रतनैर्मल्य काङ्क्षिभिः ॥ ३९ ॥
शङ्का कांक्षा च भोगानां विचिकित्सा तथैव च।
अन्यदृष्टे प्रशसा च सस्तवश्चापि मोहिन. ॥ ४० ॥
एते पञ्च परित्याज्याः सद्दृष्टे रति चारकाः।
शुद्ध सद्दृष्टिरेवस्यात् कर्मक्षपणकारणम् ॥ ४१ ॥

अर्थ—अब इसके आगे सत्तर अतिचार कहेंगे। व्रतोंकी निर्मलता चाहनेवाले पुरुषोंको उन्हें सुनकर दूर करना चाहिये। शङ्का, भोगा-काङ्क्षा, विचिकित्सा, अन्य दृष्टि प्रशसा और मोही—अन्य दृष्टिका सस्तव, ये सम्यग्दर्शनके पाँच अतिचार छोडने योग्य है क्योंकि शुद्ध—निरतिचार सम्यग्दर्शन ही कर्मक्षयका कारण होता है ॥ ३९-४१ ॥

आगे पाँच अणुव्रतोंके अतिचार कहते है—

अहिंसाणुव्रतके अतिचार

आश्रितजीवजातीना वधो बन्धो विभेदनम्।
आरोपोऽधिकभारस्य निरोधश्चान्न पानयोः ॥ ४२ ॥
अतीचारा इमे ज्ञेया अहिंसाणुव्रतस्य हि।
अतिचारान् परित्यज्य व्रत कार्यं सुनिर्मलम् ॥ ४३ ॥

अर्थ—आश्रित जीव जातियों—गाय, भैस आदिका वध—लाठी, चाबुक आदिसे पीटना, कष्ट देनेके अभिप्रायपूर्वक बन्ध—रस्सी आदि-से बाधना, सौन्दर्य बढानेकी भावनासे विभेदन—कान आदि अगोंको छेदना, अधिक भार लादना और अन्न पानीका विरोध करना—पर्याप्त भोजन नही देना, ये पाच अहिंसाणु व्रतके अतिचार है। इनका त्याग कर व्रतको निर्मल बनाना चाहिये ॥ ४२-४३ ॥

सत्याणुव्रतके अतिचार

अज्ञानाद्वा प्रमादाद्वा जीवानां हितकांक्षिणाम्।
दानं मिथ्योपदेशस्य रहस्याख्यापनं तथा ॥ ४४ ॥

कूटलेख क्रिया निन्द्या न्यासस्यापह्नुतिस्तथा।
साकारो मन्त्रभेदश्च सत्याणुव्रतशालिभि ॥ ४५ ॥
अतिचारा इमे त्याज्या सत्याणुव्रतशालिभिः।
व्रत निर्दोषमेवस्यादात्मशुद्धिविधायकम् ॥ ४६ ॥

अर्थ—हित चाहनेवाले पुरुषोको अज्ञान अथवा प्रमादसे मिथ्या उपदेश देना, स्त्री-पुरुषोके रहस्य—एकान्त बातको प्रकट करना, कूट-लेख क्रिया—झूठे लेख लिखना, धरोहरका अपहरण करनेवाले वचन कहना और साकार मन्त्र भेद—चेष्टा आदिसे किसीका अभिप्राय जानकर प्रकट करना, ये सत्याणुव्रतके अतिचार है। निर्दोष व्रतके इच्छुक सत्याणु व्रतियोको इनका त्याग करना चाहिये, क्योकि निर्दोष व्रत ही आत्मशुद्धि करनेवाला होता है ॥ ४४-४६ ॥

अचौर्याणुव्रतके अतिचार

स्तेनप्रयोग चौरार्थादाने लोभस्यवृद्धितः।
विरुद्धराज्येऽतिक्रान्तिर्मानोन्मानीय वस्तुनो ॥ ४७ ॥
हीनाधिक विधानं च सदृशस्यापि मिश्रणम्।
इत्येते पञ्च विज्ञेया अतिचारा प्रदूषका ॥ ४८ ॥
अचौर्याणु व्रतस्येह वर्जनीया विवेकिभिः।
अतिचारयुत वृत्त न स्याच्छोभास्पद क्वचित् ॥ ४९ ॥

अर्थ—**स्तेनप्रयोग**—लोभकी अधिकतासे चोरको चोरीके लिये प्रेरित करना, **तदाहृतादान**—चुराकर लायी हुई वस्तुको खरीदना, **विरुद्धराज्याति क्रम**—विरुद्ध राज्यसे तस्कर व्यापार करना, **हीनाधिक मानोन्मान**—नाप-तौलके वस्तुओको कम बढ रखना और **सदृशसन्मिश्र**—असली वस्तु मे नकली वस्तु मिलाना, ये अचौर्याणुव्रतके अतिचार विवेकी जनोके द्वारा छोडने योग्य है, क्योकि अतिचार सहित व्रत कही भी शोभित नही होता ॥ ४७-४९ ॥

ब्रह्मचर्याणुव्रतके अतिचार

कृतिरन्य विवाहस्य द्विविधेत्वरिकागतो।
अनङ्ग क्रीडनं तीव्र कामेच्छा व्रतधारिणः ॥ ५० ॥
अतिचारा इमे ज्ञेया ब्रह्मचर्यव्रतस्य हि।
एतान् सर्वान् परित्यज्य विधेय विमलं व्रतम् ॥ ५१ ॥

अर्थ—**अन्यविवाह करण**—अपनो या अपने आश्रित सन्तानको छोड़कर दूसरोका विवाह करना, **परिगृहीतेत्वरिकागति**—दूसरेके द्वारा गृहीत कुलटा स्त्रियोसे व्यवहार रखना, **अपरिगृहीतेत्वरिकागति**—दूसरेके द्वारा अगृहीत कुलटा स्त्रियोसे व्यवहार रखना, **अनङ्ग-क्रीड़ा**—काम-सेवनके लिये निश्चित अङ्गोसे अतिरिक्त अङ्गो द्वारा क्रीड़ा करना और **तीव्र कामेच्छा**—काम-सेवनमे तीव्र लालसा रखना, ये ब्रह्मचर्याणुव्रतके अतिचार हैं। इन सबका त्याग कर व्रतको निर्मल करना चाहिये ॥ ५०-५१ ॥

क्षेत्रवास्त्वो रुक्मभर्मणोर्धनधान्ययोस्तथा ।
दासदास्योस्तथाकुप्य भाण्डयोश्च व्यतिक्रमः ॥ ५२ ॥
एते पञ्च परिप्रोक्ता अतिचारा जिनागमे ।
त्याज्याः स्वहित कामैर्वं पञ्चमाणु व्रतस्य हि ॥ ५३ ॥

अर्थ—**क्षेत्रवास्तुप्रमाणातिक्रम**—खेत व मकानोकी सीमाका उल्लङ्घन करना, **रुक्मभर्मप्रमाणातिक्रम**—चादी, स्वर्णकी सीमाका उल्लघन करना, **धनधान्यप्रमाणातिक्रम**—गाय-भैस आदि पशुधन और गेहू, धान, चना आदि अनाजकी सीमाका व्यतिक्रम करना, **दासीदासप्रमाणातिक्रम**—संपत्ति रूपसे स्वीकृत दासीदासके प्रमाणका उल्लघन करना और **कुप्यभाण्डप्रमाणातिक्रम**—वस्त्र तथा बर्तनोकी सीमाका व्यतिक्रम करना, ये परिग्रह परिमाण व्रतके अतिचार हैं। आत्महितके इच्छुक मनुष्योको इनका त्याग करना चाहिये ॥ ५२-५३ ॥

आगे गुणव्रतोके अतिचार कहते है—

दिग्व्रतके अतिचार

अज्ञानाद्वा प्रमादाद्वा ह्यूर्ध्वसीमव्यतिक्रमः ।
अधोव्यतिक्रमश्चैव तिर्यक्सीम व्यतिक्रमः ॥ ५४ ॥
लोभाद्वा क्षेत्रवृद्धिश्च ह्याधानमन्यथास्मृतेः ।
अतिचारा इमे त्याज्याः काष्ण व्रतममीप्सुभिः ॥ ५५ ॥

अर्थ—प्रमाद अथवा अज्ञानसे ऊर्ध्व सीमाका उल्लंघन करना, अध—नीचे जानेकी सीमाका उल्लंघन करना तिर्यक् सीमा—समान धरातलकी सीमाका उल्लंघन, लोभवश किसी दिशाकी सीमा घटाकर अन्य दिशाकी सीमामे वृद्धि कर लेना और कृत सीमाको भूलकर अन्य

सीमाको स्मृतिमें रखना, ये दिग्व्रतके अतिचार हैं। निर्दोष दिग्व्रतकी इच्छा रखने वाले पुरुषोके द्वारा ये छोड़ने योग्य हैं ॥ ५४-५५ ॥

देशव्रतके अतिचार

आनयनं बहिः सीम्नो यस्य कस्यापि वस्तुनः।
प्रेषणं प्रेष्यवर्गस्य शब्दस्य प्रेषणं बहिः ॥ ५६ ॥
प्रदर्शनं स्वरूपस्य क्षेपणं पुद्गलस्य च।
इत्थं मनीषिभिः प्रोक्ता दोषा देशव्रतस्य हि ॥ ५७ ॥
त्याज्या मनस्विभिर्नित्यं निर्दोषव्रतवाञ्छिभिः।
व्रतं सदोषं नो भाति मलिनं ह्यम्बरं यथा ॥ ५८ ॥

अर्थ—मर्यादाके बाहरसे जिस किसी वस्तुको बुलाना, मर्यादाके बाहर सेवक समूहको भेजना, मर्यादाके बाहर अपना शब्द पहुँचाना—फोन आदि करना, मर्यादाके बाहर कार्य करने वालोको अपना स्वरूप दिखाना और मर्यादाके बाहर पुद्गल—ककड-पत्थर फेकना या पत्र आदि भेजना, ये विद्वज्जनोके द्वारा देशव्रतके अतिचार कहे गये है। निर्दोषव्रतकी इच्छा रखने वाले विचारशील मनुष्योको इनका सदा त्याग करना चाहिये, क्योकि सदोष व्रत मलिन वस्त्रके समान सुशोभित नही होता ॥ ५६-५८ ॥

अनर्थदण्डव्रतके अतिचार

कन्दर्पश्च कौत्कुच्यं च मौखर्यं चासमीक्ष्य वै।
अधिकस्य समारम्भ स्वप्रयोजनमन्तरा ॥ ५९ ॥
भोगोपभोगवस्तूनां सग्रहोऽनर्थको महान्।
चित्तविक्षेपकारित्वादाकुलताविधायक ॥ ६० ॥
अतिचारा इमेत्याज्यास्तृतीयेऽनर्थदण्डके।
लक्ष्यप्राप्तिर्यतो नास्ति सदोष व्रतधारणे ॥ ६१ ॥

अर्थ—**कन्दर्प**—रागमिश्रित भण्ड वचन बोलना, **कौत्कुच्य**—उसके साथ शरीरसे कुचेष्टा करना, **मौखर्य**—उसके साथ निरर्थक अधिक बोलना, स्वकीय प्रयोजनके न होने पर भी विचार बिना अधिक आरम्भ कराना और भोगोपभोगकी वस्तुओका निरर्थक ऐसा बड़ा सग्रह करना जो चित्तविक्षेपका कारण होनेसे आकुलता उत्पन्न करने वाला हो। अनर्थदण्डव्रत नामक तृतीय गुणव्रतके ये अतिचार छोडने योग्य है क्योकि सदोष व्रतके धारण करने पर लक्ष्यको प्राप्ति नही होती ॥ ५९-६१ ॥

सामायिकशिक्षाव्रतके अतिचार

चेतसश्चञ्चलत्वं च वचोदुष्प्रणिधानता।
शरीरस्यान्यथावृत्तिरादराभाव एव च ॥ ६२ ॥
पाठस्य विस्मृतिश्चैते सामायिकव्यतिक्रमाः।
त्याज्याः सुश्रावकैर्नित्यं निन्दनीया महर्षिभि ॥ ६३ ॥

अर्थ—चित्तकी चञ्चलता, वचनकी दुष्प्रणिधानता, शरीरकी अन्यथा-वृत्ति—इधर-उधर देखना, आदरका अभाव और पाठकी विस्मृति, ये सामायिकके अतिचार महर्षियोंके द्वारा निन्दनीय हैं। उत्तम श्रावकोंको इनका त्याग करना चाहिये ॥ ६२-६३ ॥

प्रोषधोपवास शिक्षाव्रतके अतिचार

अदृष्टामार्जितस्थाने मलादीनां विमोचनम्।
अदृष्टामार्जितस्थाने संस्तरस्य प्रसारणम् ॥ ६४ ॥
अदृष्टामार्जितादानमादराभाव एव च।
तिथेर्व्यतिक्रमश्चापि विस्मरण विधेरपि ॥ ६५ ॥
शिक्षाव्रतस्य विज्ञेया द्वितीयस्य व्यतिक्रमाः।
एते सर्वेऽपि सत्याज्या निर्मलव्रतवाञ्छिभिः ॥ ६६ ॥

अर्थ—क्षुधासम्बन्धी शिथिलताके कारण बिना देखे, बिना शोधे स्थान पर मलादिकका छोड़ना, बिना देखे, बिना शोधे स्थान पर बिस्तर आदिका फैलाना, बिना देखे, बिना शोधे उपकरण आदिका ग्रहण करना, आदरका अभाव और उपवासकी तिथिका उल्लघन करना, ये द्वितीय शिक्षाव्रतके अतिचार हैं। निर्मल व्रतकी इच्छा रखने वाले पुरुषोंके द्वारा ये सभी छोडने योग्य हैं ॥ ६४-६६ ॥

भोगोपभोग परिमाण शिक्षाव्रतके अतिचार

लौल्यात्सचित्तसेवा सचित्तेन युतस्य च।
मिश्रस्य च सचित्तेन भोगोऽभिषवसेवनम् ॥ ६७ ॥
दुष्पक्वस्य पदार्थस्य ग्रहण चातिगृद्धितः।
शिक्षाव्रत तृतीयस्य परित्याज्या अतिक्रमाः ॥ ६८ ॥
इन्दुर्यथा कलङ्केन युक्तो नैव विशोभते।
तथा दोषैश्च सयुक्तो व्रतो नैवात्र शोभते ॥ ६९ ॥

अर्थ—भोगाकाक्षाकी आतुरतासे सचित्त वस्तुका सेवन करना, सचित्तसे सम्बद्ध वस्तुका सेवन करना, सचित्तसे मिली हुई वस्तुका

सेवन करना, विकारवर्द्धक गरिष्ठ वस्तुका सेवन करना और दुष्पक्व—अर्धपक्व या अर्धदग्ध पदार्थको ग्रहण करना, ये भोगोपभोग परिमाण नामक तृतीय शिक्षाव्रतके अतिचार है। इनका परित्याग करना चाहिये क्योकि जिस प्रकार कलङ्कसे युक्त चन्द्रमा सुशोभित नही होता, उसी प्रकार दोषोसे युक्त व्रती इस भूतल पर सुशोभित नही होता ॥ ६७-६९ ॥

अतिथि संविभाग व्रतके अतिचार

सचित्तभाजने दत्तः पिहितश्च सचित्तत ।
परैः प्रदीयमानश्च मात्सर्यमितरैर्जनैः ॥ ७० ॥
कालस्योल्लङ्घनं दाने प्रमादवशतो नृणाम् ।
तुर्यशिक्षाव्रतस्यैते दोषास्त्याज्याः सदा बुधैः ॥ ७१ ॥

अर्थ—सचित्त--हरित पत्ते आदि बर्तन पर रक्खा हुआ आहार देना, सचित्त—हरित पत्र आदिसे ढका हुआ आहार देना, परव्यपदेश—दूसरेसे आहार दिलाना, मात्सर्य—अन्य दातारोसे ईर्ष्या करना और कालोल्लघन—प्रमादवश दानके योग्य समयका उल्लघन करना, ये पाच अतिथिसंविभाग नामक चतुर्थ शिक्षाव्रतके अतिचार ज्ञानी जनोके द्वारा सदा छोडने योग्य है ॥ ७०-७१ ॥

सल्लेखनाके अतिचार

जीविताशसनं जातु मरणाशसनं क्वचित् ।
मित्रैः सहानुरागश्चानुबन्धो भुक्तशर्मण ॥ ७२ ॥
निदान चेति विज्ञेया. सन्यासस्य व्यतिक्रमाः ।
एते सर्वे परित्याज्या. स्वर्गमोक्षाभिलाषिभिः ॥ ७३ ॥

अर्थ—कभी जीवित होनेकी आकाक्षा करना, कही कष्ट अधिक होने पर जल्दी मरनेकी इच्छा करना, मित्रोके साथ अनुराग रखना, पूर्वभुक्त सुखका स्मरण करना और निदान—आगामो भोगोकी इच्छा रखना, ये सन्यास—सल्लेखनाके अतिचार जानने योग्य है। स्वर्ग-मोक्षके इच्छुक पुरुषोको इन सब अतिचारोका परित्याग करना चाहिये ॥ ७२-७३ ॥

व्रत और शीलका विभाग

अणुव्रतानि कथ्यन्ते व्रतशब्देन सूरिभिः ।
शेषाणि सप्त कथ्यन्ते शीलशब्देन सूरिभिः ॥ ७४ ॥

कृषीवला यथा लोके परित: क्षेत्रसञ्चयम्।
कृत्वा वृतिं सुरक्षन्ति दुर्लभां सस्यसम्पदम् ॥ ७५ ॥
तथा शीलानि सधृत्य व्रतिनो मानवा भुवि।
अत्यन्त दुर्लभां लोके रक्षन्ति व्रतसम्पदम् ॥ ७६ ॥

अर्थ—अणुव्रत, आचार्यों द्वारा व्रत शब्दसे कहे जाते हैं और शेष सात—तीन गुणव्रत, चार शिक्षाव्रत, शील शब्दसे कहे जाते हैं। जिस प्रकार लोकमे किसान खेतोके चारो ओर बाड़ लगाकर दुर्लभ धान्य सपत्तिकी रक्षा करते हैं उसी प्रकार पृथिवो पर व्रती मनुष्य शीलोको धारण कर लोकमे अत्यन्त दुर्लभ व्रतरूप सम्पत्तिकी रक्षा करते हैं ॥ ७४-७६ ॥

अब आगे श्रावकोको जिनपूजा आदिका निर्देश देते है—

भक्त्या जिनेन्द्रदेवस्य द्रव्यैः सारतरैरिह।
अर्चा नित्य विधेयास्ति सर्वसंकटहारिणी ॥ ७७ ॥
मन्दिराणि यथाशक्ति जिनदेवस्य भक्तितः।
निर्मापयितुमर्हाणि मेरुतुल्यानि सर्वदा ॥ ७८ ॥
तेषु जिनेन्द्रदेवस्य प्रतिमाश्चापि सुन्दराः।
स्थापनीया प्रतिष्ठाभिः कृत्वा भव्य महोत्सवम् ॥ ७९ ॥

अर्थ—श्रावकोको प्रतिदिन अत्यन्त श्रेष्ठ अष्ट द्रव्योके द्वारा भक्तिपूर्वक जिनेन्द्रदेवकी पूजा करना चाहिये क्योंकि जिनपूजा सब सकटोको हरने वाली है। श्रावकोको सदा भक्तिपूर्वक सुमेरुके समान—उत्तुङ्ग जिनमन्दिर भी यथाशक्ति बनवानेके योग्य है, तथा उनमे प्रतिष्ठाओ द्वारा महोत्सव कर जिनेन्द्र भगवान्‌की सुन्दर—मनोज्ञ प्रतिमाएँ स्थापित करना चाहिये ॥ ७७-७९ ॥

आगे जिनवाणीके प्रसारका निर्देश देते है—

जिनवाणी प्रसाराय प्रयत्नो व्रतिभिर्जनैः।
कार्यः सदा स्वद्रव्येण संचितेन सुभक्तितः ॥ ८० ॥
विद्यालयाश्च संस्थाप्याश्छात्रवृन्देन संयुताः।
शिक्षकास्तत्र संयोज्या योग्यवृत्त्याभितोषिताः ॥ ८१ ॥
विद्वांसो दानमानार्हाः सच्छास्त्रेषु कृतश्रमाः।
साम्प्रतं जिनशास्त्राणामाधाराः सन्ति ते यतः ॥ ८२ ॥
निर्ग्रन्थमुद्रयोपेता विरक्ता भवभोगतः।
शश्वदात्म हितोद्युक्ताः परकल्याणकाङ्क्षिणः ॥ ८३ ॥

मुनयोऽपि सदावन्द्या जैनधर्मप्रभावका ।
तेषां प्रभावना कार्या जनतानन्ददायिनी ॥ ८४ ॥
दीनहीनजना लोके कारुण्यावहमूर्तयः ।
अन्नवस्त्रादिदानेन रक्षणीयाः सदा नरैः ॥ ८५ ॥
आरोग्यलाभसंस्थान निचया धनदानतः ।
पोषणीयाः सदा स्वीय शरीर सहयोगतः ॥ ८६ ॥
लोककल्याण कारीणि कार्याणि विविधान्यपि ।
यथाशक्ति विधेयानि करुणापूर्ण मानसैः ॥ ८७ ॥

अर्थ—व्रती मनुष्योको अपने सचित द्रव्यके द्वारा सदा भक्तिपूर्वक जिनवाणोके प्रसारके लिये कार्य करना चाहिये। छात्र समूहसे सहित विद्यालय भी स्थापित करना चाहिये और उनमे योग्यवृत्तिसे सतोषित अध्यापकोको सयोजित करना चाहिये। समीचीन शास्त्रोमे परिश्रम करने वाले विद्वान् भी दान तथा सम्मानके योग्य है क्योकि वे इस समय जिनशास्त्रोके आधारभूत हैं। निर्ग्रन्थ मुद्रासे सहित, ससार सम्बन्धी भोगोसे विरक्त, निरन्तर आत्महितमे तत्पर, परकल्याणके इच्छुक तथा जैनधर्मकी प्रभावना करने वाले मुनि भी सदा वन्दनोय है। जनसमूहको आनन्द देने वाली उनको प्रभावना करना चाहिये। जिनके शरोरको देखकर करुणा उत्पन्न होतो है ऐसे दोन-हीन मनुष्य भी लोकमे सदा अन्न-वस्त्रादि देकर रक्षा करनेके योग्य है। आरोग्य लाभके सस्थान जो औषधालय आदि हैं वे भी धन-दानसे तथा अपने शारीरिक सहयागसे सदा पोषणोय है—पुष्ट करनेके योग्य है। जिनका हृदय करुणासे पूर्ण है ऐसे मनुष्योको यथाशक्ति लोककल्याणकारो अन्य कार्य भी करनेके याग्य है ॥ ८० ८७ ॥

आगे प्रतिमाओका वर्णन करते है—

अप्रत्याख्यानावरण मोहस्य क्षयोपशमात् ।
प्रत्याख्यानावृतेः किञ्चोदयस्य तारतम्यत. । ८८ ॥
श्रावकोऽयं यथाशक्ति प्रतिमासु प्रवर्तते ।
प्रतिमाः सन्ति ता एता एकादश मिता भुवि ॥ ८९ ॥
दर्शनिको व्रती चापि सामायिकसमुद्यतः ।
प्रोषधव्रतधारी च सचित्तत्याग तत्परः ॥ ९० ॥
रात्रिभुक्तिपरित्यागी ब्रह्मचर्यविशोभित ।
कृतारम्भपरित्यागः सङ्गत्यागेन शुम्भितः ॥ ९१ ॥

विगतानुमतिः किञ्च सन्तुष्टः स्वात्मसम्पदि।
उद्दिष्टान्न परित्यागी तत्रस्था श्रावका मताः ॥ ९२ ॥
क्रमशोवर्धमानेन संयमेन सुशोभिता।
एषां क्रमेण वक्ष्यामि लक्षणानि यथागमम् ॥ ९३ ॥

अर्थ—अप्रत्याख्यानावरण नामक चारित्रमोहके क्षयोपशम और प्रत्याख्यानावरण कषायके उदयको तरतमता—हीनाधिकतासे यह श्रावक अपनी शक्तिके अनुसार प्रतिमाओमे प्रवृत्त होता है—उन्हें धारण करता है। वे प्रतिमायें यहा ग्यारह है—१ दर्शनिक, २ व्रती, ३ सामयिकी, ४ प्रोषधव्रतधारी, ५ सचित्त त्यागी, ६ रात्रिभुक्ति त्यागी, ७. ब्रह्मचर्यसे सुशोभित, ८ आरम्भ त्यागी, ९. परिग्रहत्यागसे सुशोभित, १० अपनी आत्म-संपदामे संतुष्ट रहने वाला अनुमति त्यागी और ११ उच्छिष्टान्न परित्यागी, ये ग्यारह प्रतिमाए हैं। इनमे स्थित रहने वाले व्रती, श्रावक कहलाते है। ये श्रावक क्रम से बढते हुए चारित्र से सुशोभित रहते हैं। अब यहा क्रम से आगम के अनुसार इनके लक्षण कहूंगा ॥ ८८-९३ ॥

दर्शनिक श्रावक (प्रथम प्रतिमाधारी) का लक्षण

सम्यग्दर्शनसपन्नः सप्तव्यसनदूरगः।
अष्टमूलगुणैर्युक्तो दर्शनिकः समुच्यते ॥ ९४ ॥
देवशास्त्रगुरूणां यो मोक्षमार्गोपयोगिनाम्।
श्रद्धया परया युक्त सम्यग्दृष्टिः स उच्यते ॥ ९५ ॥
द्यूतं मांसं च मद्यं च वेश्याखेटकौ तथा।
चौर्यं परपुरन्ध्रीणां सेवनं व्यसनं मतम् ॥ ९६ ॥
एषां यस्य परित्यागो दर्शनिकः स उच्यते।
[1]मद्यं मांसं च क्षौद्रं च यो नाश्नाति कदाचन ॥ ९७ ॥
नोदुम्बरादिकं भुङ्क्ते न भुङ्क्ते निशि जात्वपि।
कुरुते जीव कारुण्यं करोति जिनदर्शनम् ॥ ९८ ॥
नादत्तेऽगालित नीरं स स्यान्मूल गुणाश्रयी।
परमेष्ठिपदाम्भोजं शरणं गतवान् सुधीः ॥ ९९ ॥
एव दर्शनिको नूनं विरक्तो भवभोगतः।
प्रथमः श्रावकः प्रोक्तो जैनागम विशारदैः ॥ १०० ॥

---

१. मद्य पल मधु निशासन पञ्चफली विरति पञ्चकाप्तनुति।
जीवदया जलगालन मिति च क्वचिदष्ट मूलगुणा ॥
सागार धर्मामृत

अर्थ—जो सम्यग्दर्शन से सहित हो, सात व्यसनों से दूर हो, आठ मूलगुणो से युक्त हो वह दर्शनिक श्रावक कहलाता है। जो मोक्ष मार्ग मे उपयोगी देव शास्त्र गुरु की उत्कृष्ट श्रद्धा से युक्त हो, वह सम्यग्दृष्टि कहा जाता है। जुआ, मास, मदिरा, वेश्या, शिकार, चोरी और परस्त्री सेवन ये सात व्यसन माने गये हैं। इनका परित्यागी दर्शनिक होता है। जो कभी भी मद्य, मास, मधु को नही खाता है, न उदुम्बर आदि पाच फलोंको खाता है, न कभी रात्रि मे भोजन करता है, जीव दया पालता है, जिनदर्शन करता है और बिना छना पानी नही लेता, वह अष्टमूल गुणो का धारक होता है। साथ ही जो ससारके भोगोसे विरक्त हो पञ्चपरमेष्ठीके चरण कमलोकी शरण को प्राप्त हुआ है वह जैनागमके ज्ञाता पुरुषोके द्वारा दर्शनिक नामक प्रथम श्रावक कहा गया है ॥ ९४-१०० ॥

व्रतिक श्रावक (दूसरी प्रतिमा) का लक्षण

द्वादशव्रत सम्पन्नो जैनाचारपरायणः ।
व्रतिकः कथ्यते लोके द्वितीयः श्रावकस्तथा ॥ १०१ ॥

अर्थ—जो पाच अणुव्रत, तीन गुणव्रत और चार शिक्षाव्रत, इन बारह व्रतोसे सहित तथा जैन कुलोचित आचारमे तत्पर है वह जगत् मे व्रतिक—द्वितीय प्रतिमाधारी श्रावक कहलाता है ॥ १०१ ॥

सामायिकी (तृतीय प्रतिमा) का लक्षण

सामायिकं त्रिसन्ध्यासुप्रत्यहं विदधाति यः ।
सामायिकी स सम्प्रोक्तस्तत्त्वचिन्तन तत्परः ॥ १०२ ॥

अर्थ—जो प्रतिदिन तीनो संध्याओमे सामायिक करता है तथा तत्त्व विचार करनेमे तत्पर रहता है वह सामायिकी—तृतीय प्रतिमाधारी श्रावक कहा गया है ॥ १०२ ॥

प्रोषधिक (चतुर्थ प्रतिमा) का लक्षण

अष्टम्यां च चतुर्दश्यां प्रोषधं नियमेन यः ।
करोति रुचि सम्पन्न स हि प्रोषधिको मत ॥ १०३ ॥

अर्थ—जो रुचिपूर्वक अष्टमी और चतुर्दशीको नियमसे प्रोषध करता है वह प्रोषधिक चतुर्थ प्रतिमाधारी श्रावक कहलाता है ॥ १०३ ॥

सचित्तत्यागी (पञ्चम प्रतिमा) का लक्षण

सचित्तं वस्तु नो भुङ्क्ते योऽम्भः पत्रफलादिकम् ।
स सचित्तपरित्यागी कथ्यते दयया युतः ॥ १०४ ॥

अर्थ--जो दयासे युक्त होता हुआ पानी, पत्र तथा फलादिक सचित्त वस्तुको नही खाता है वह सचित्त त्यागी पञ्चम श्रावक कहलाता है ॥ १०४ ॥

रात्रिभुक्ति त्यागी (षष्ठ प्रतिमा) का स्वरूप

रात्रिमध्ये न यो भुङ्क्ते भोजनं च चतुर्विधम् ।
रात्रिभुक्ति परित्यागी षष्ठोऽसौ श्रावक. स्मृतः ॥ १०५ ॥

अर्थ--जो रात्रिमे चार प्रकार का भोजन नही करता है वह रात्रि-भुक्ति त्यागी षष्ठ श्रावक कहलाता है ॥ १०५ ॥

ब्रह्मचारी (सप्तम प्रतिमा) का लक्षण

दारमात्रपरित्यागी ब्रह्मचारी समुच्यते ।
विरक्तिभावमापन्नो विभीतश्च भवार्णवात् ॥ १०६ ॥

अर्थ--जो स्त्री मात्रका परित्यागी है, वैराग्यभावको प्राप्त है तथा संसार सागरसे भयभीत है वह ब्रह्मचारी सप्तम प्रतिमाका धारी श्रावक कहलाता है ॥ १०६ ॥

आरम्भत्यागी (अष्टम प्रतिमा) का लक्षण

पुरासंचितवित्तेषु सन्तुष्टोऽन्यगतस्पृहः ।
व्यापारस्य परित्यागी त्यक्तारम्भः समुच्यते ॥ १०७ ॥

अर्थ--जो पहले संचित किये हुए धनमे संतुष्ट है, अन्य धनमे जिसकी इच्छा समाप्त हो गई है और जिसने व्यापारका परित्याग कर दिया है वह आरम्भत्यागी अष्टम प्रतिमाधारी श्रावक कहलाता है ॥ १०७ ॥

अपरिग्रह (नवम प्रतिमा) का लक्षण

मुक्त्वा ह्यावश्यकं वस्त्रं भाजनं च कटादिकम् ।
यो नान्यद्धनमादत्ते सोऽपरिग्रह उच्यते ॥ १०८ ॥

अर्थ--जो आवश्यक वस्त्र, बर्तन और चटाई आदिको छोडकर अन्य परिग्रहको ग्रहण नहीं करता है वह अपरिग्रह नवम प्रतिमाधारी श्रावक कहलाता है ॥ १०८ ॥

अनुमतिविरत (दशम प्रतिमा) का लक्षण

व्यापारगृह निर्माण प्रभृतौ नानुमोदनम् ।
कुरुते यः स विज्ञेयोऽनुमतेर्विरतोगृही ॥ १०९ ॥

अर्थ--जो व्यापार तथा गृह निर्माण आदिमे अनुमोदना नही करता है उसे अनुमतिविरत श्रावक जानना चाहिये ॥ १०९ ॥

उद्दिष्टत्याग (ग्यारहवीं प्रतिमा) का स्वरूप

उद्दिष्टं चान्नपानादि यो न गृह्णाति जातुचित् ।
ज्ञेय उद्दिष्ट सन्त्यागी स एकादश उत्तम. ॥ ११० ॥
उद्दिष्टत्याग भेदस्य द्वौ भेदौ च निरूपितौ ।
ऐलक क्षुल्लकश्चेति प्रसिद्धौ चरणागमे ॥ १११ ॥
कौपीनमात्रकं धत्ते लिङ्गावरणमेलकः ।
क्षुल्लकस्तु समादत्तेऽतिरिक्त खण्डवस्त्रकम् ॥ ११२ ॥
ऐलक पाणिभोज्यस्ति क्षुल्लक पात्रभोजिक ।
उपविश्यैव भुञ्जाते क्षुल्लको ह्येलकस्तथा ॥ ११३ ॥
ऐलक कुरुते लुञ्चं केशानां च यथाविधि ।
क्षुल्लकोऽपनयेत् केशान् कर्तर्यापि करेण वा ॥ ११४ ॥
केकि पिच्छ च गृह्णीतो जीवानां रक्षणाय तौ ।
शौचबाधानिवृत्यर्थमाददाते कमण्डलुम् ॥ ११५ ॥
आर्या धत्ते सितां शाटी षोडशहस्तसंमिताम् ।
क्षुल्लिका च समादत्ते धवल तूत्तरच्छदम् ॥ ११६ ॥
ऐलकवत् परिज्ञेय आसां चर्यादिसंविधिः ।
आर्यिकास्तूपचारेण महाव्रतयुता मताः ॥ ११७ ॥
क्षुल्लिकाः श्राविका एव वर्तन्ते नात्र संशय ।
यैः कृतं सफल जन्म निर्दोषाचार धारणात् ॥ ११८ ॥
धन्यास्ते धन्यभागास्ते शुष्कप्रायभवार्णवाः ।
मुनीनां महता वृत्तं रक्षितुं शक्नुवन्ति नो ॥ ११९ ॥
तेषां कृते प्रयासोऽयं श्रावकाचार वर्णने ।
जैनधर्मो यतः सर्वजीवानां हित कारकः ॥ १२० ॥

अर्थ--जो अपने उद्देश्यसे बनाये गये अन्न पानोको कभी ग्रहण नही करता वह उद्दिष्ट त्यागी एकादश प्रतिमाधारी उत्तम श्रावक माना गया है। उद्दिष्ट त्याग प्रतिमाके दो भेद कहे गये हैं--एलक और क्षुल्लक। ये दोनो भेद चरणानुयोग मे प्रसिद्ध है। ऐलक कोपीन

नामक लिङ्गका आवरण (लंगोटी) धारण करते हैं और क्षुल्लक कौपीनके सिवाय एक खण्ड वस्त्र भी ग्रहण करते हैं। ऐलक हाथमे ही भोजन करते हैं परन्तु क्षुल्लक पात्रभोजी होते हैं। ऐलक और क्षुल्लक–दोनो ही बैठकर आहार करते हैं। ऐलक, विधि अनुसार केशोंका लोच करते हैं और क्षुल्लक लोच, कैंची अथवा उस्तराके द्वारा केशोको दूर करते हैं। दोनों ही जीव-रक्षाके लिये मयूरपिच्छ ग्रहण करते हैं और शौचबाधा की निवृत्तिके लिये कमण्डलु धारण करते हैं।

आर्यिका सोलह हाथकी सफेद साडी ग्रहण करती है और क्षुल्लिका साडीके ऊपर एक सफेद चद्दर भी रखती है। इन सबकी चर्याविधि ऐलकके समान जानना चाहिये। आर्यिकाए उपचारसे महाव्रतसे युक्त कही गई हैं परन्तु क्षुल्लिका श्राविका ही है इसमे संशय नही करना है। ग्रन्थकर्ता कहते हैं कि जिन्होने निर्दोष-चारित्र धारण करनेसे अपना जन्म सफल किया है वे धन्य हैं तथा धन्यभाग हैं, उनका संसार-सागर प्राय सूख गया है। बडे-बडे मुनियोका चारित्र धारण करनेको जिनकी शक्ति नही है उनके लिये श्रावकाचारका वर्णन करनेके लिये मेरा यह प्रयास है क्योकि जैनधर्म सब जीवोका हित करने वाला है ॥ ११०-१२० ॥

आगे इस प्रकरणका समारोप करते हैं--

वृत्तं मुनीनां गृहिणां नृणां च यथेच्छमाचर्य महोत्सवेन ।
दुःखान्निवृत्योत्तमसौख्यराशौ मग्ना भवेयुः सतत पुमांसः ॥ १२१ ॥
आचार एव प्रथमोऽस्ति धर्म इति श्रुतिं ये हृदये धरन्ते ।
ते श्वभ्रदुःखाद् विनिवर्तमानाः स्वर्गापवर्गीय सुखं लभन्ते ॥ १२२ ॥

अर्थ—ग्रन्थकारकी भावना है कि मुनियो तथा गृहस्थ मानवोके चारित्रको हर्षपूर्वक इच्छानुसार धारणकर पुरुष दुःखसे निवृत्त होते हुए उत्तम-सुख समूहमे सदा निमग्न रहे। 'आचारः प्रथमो धर्मः' आचार पहला धर्म है इस श्रुतिको जो हृदयमे धारण करते हैं वे नरक के दुःखसे दूर रहते हुए स्वर्ग और मोक्षके सुखको प्राप्त होते हैं ॥ १२१-१२२ ॥

इस प्रकार सम्यक्-चारित्र-चिन्तामणिमे श्रावकाचारका
वर्णन करने वाला द्वादश प्रकाश पूर्ण हुआ।

त्रयोदश प्रकाश

